**'नीलं तमश्चलति' इत्यबाधितप्रतीतिबलान्नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत् सिद्धम् । तत्र तमसो नाकाशादिपञ्चकेऽन्तर्भावो रूपवत्त्वात् । अत एव न वायौ, स्पर्शाभावात् सदा गतिमत्त्वाभावाच्च । नापि तेजसि, भास्वररूपाभावाद् उष्णस्पर्शाभावाच्च । नापि जले, शीतस्पर्शाभावान्नीलरूपाश्रयत्वाच्च । नापि पृथिव्यां, गन्धवत्त्वाभावात् स्पर्शरहितत्वाच्च । तस्मात् तमो दशमद्रव्यं, इति चेत् ? न, तमसस्तेजोऽभावरूपत्वात् । तथाहि-तमो हि न रूपि द्रव्यम्, आलोकाऽसहकृतचक्षुर्ग्राह्यत्वाद् आलोकाभाववत्, रूपिद्रव्यचाक्षुषप्रमायाम् आलोकस्य कारणत्वात् । तस्मात्प्रौढप्रकाशकतेजःसामान्याभावस्तमः । तत्र 'नीलं तमश्चलति' इति प्रत्ययो भ्रमः । अतो नव द्रव्याणि इति सिद्धम् ।**



**द्रव्यत्वजातिमत्त्वं गुणवत्त्वं वा द्रव्यसामान्यलक्षणम् । लक्ष्यैकदेशावृत्तित्वम् 'अव्याप्तिः,' यथा गोः-कपिलत्वम् । अलक्ष्यवृत्तित्वम् 'अतिव्याप्तिः,' यथा गोः-शृङ्गित्वम् । लक्ष्यमात्राऽवर्तनम् 'असम्भवः,' यथा गोः-एकशफत्वम् । एतद्दूषणत्रयरहितो धर्मो लक्षणम्, यथा गोः-सास्नादिमत्त्वम् । स एव 'असाधारणधर्म' इत्युच्यते । लक्ष्यतावच्छेदकत्वम् अनियतत्वम् असाधारणत्वम् । व्यावर्तकस्यैव लक्षणत्वे व्यावृतौ अभिधेयत्वादौ च अतिव्याप्तिवारणाय-तद्भिन्नत्वं धर्मविशेषणं देयम् । व्यवहारस्यापि लक्षणप्रयोजनत्वे तु न देयं, व्यावृत्तेरपि व्यवहारसाधनत्वात् । ननु गुणवत्त्वं न द्रव्यसामान्यलक्षणम् आद्यक्षणे, उत्पन्नविशिष्टद्रव्ये चाव्याप्तेः, इति चेत् ? न, गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्य विवक्षितत्वात् । नन्वेवमपि 'एकं रूपं रसात् पृथग्' इति व्यवहाराद् रूपादौ अतिव्याप्तिः, इति चेत् ? न, एकार्थसमवायादेव तादृशव्यवहारोपपत्तौ गुणे गुणानङ्गीकारात् ।**

**तत्र तमस** इति । तमः पक्षः, आकाशादिपञ्चकानन्तर्भूतत्वं साध्यते, रूपवत्त्वं हेतुः, पृथिव्यादिर्दृष्टान्तः । एवमग्रेऽपि । **प्रौढप्रकाशे**त्यादि । परमाणुरूपस्य तेजसः सर्वत्र विद्यमानत्वात् सत्यपि तमसि तमोनास्तित्वापत्तिः, तद्वारणाय प्रौढपदम् । सुवर्णादिमत्प्रदेशे सत्यपि तमसि तमसो नास्तित्वापत्तिवारणाय प्रकाशपदम् । प्रौढप्रकाशकतेजसः सूर्यस्वरूपस्य ग्रहणात् प्रदीपादिमत्प्रदेशे तमसोऽस्तित्वापत्तिः, तद्वारणाय सामान्यपदम् ।

द्रव्यलक्षणमाह **द्रव्यत्वे**त्यादि । ***ननु*** द्वितीयं लक्षणं किमर्थम् ? ***अत्रोच्यते,*** लक्षणस्य लक्षणान्तराऽदूषकत्वान्न दोषः । यद्वाऽऽद्ये पक्षतावच्छेदकहेत्वोरैक्यात् सिद्धसाधनतादोषः, तदर्थं द्वितीयं लक्षणं बोध्यम् । तथाहि-'द्रव्यम् इतरेभ्यो भिद्यते द्रव्यत्वात्' । अत्र द्रव्यं पक्षः, पक्षता द्रव्ये, पक्षतावच्छेदकं द्रव्यत्वम्, हेतुरपि द्रव्यत्वम् । एवं च द्वयोरैक्ये सति सिद्धसाधनता दोषः ।

**असाधारणधर्म** इत्यादि । लक्षणस्य लक्षणं तु अग्रे विवरिष्यामः ।

**आद्यक्षणे** इति । आद्यक्षणावच्छिन्ने द्रव्ये इत्यर्थः । आद्यक्षणे द्रव्यं निर्गुणमेवोत्पद्यते । पश्चात् तत्समवेता गुणा जायन्ते इत्युक्तत्वात् तत्राऽव्याप्तिः । ***ननु*** द्रव्यगुणयोर्युगपदेवोत्पत्तिः कुतो न ? ***उच्यते,*** सव्येतरगोविषाणयोरिव समानकालीनयोः कार्यकारणभावो नास्ति । अत्र तु द्रव्यं किल गुणं प्रति समवायिकारणं वर्तते यथा घटरूपं प्रति घटः समवायिकारणमिति । ततश्च न तयोर्युगपदुत्पत्तिरिति । **गुणसमानाधिकरणे**त्यादि गुणसमानाधिकरणा गुणाधिकरणवर्तिनी सत्ताभिन्ना एतादृशी या जातिः द्रव्यत्वरूपा जातिः, तद्वत्त्वं वर्तते द्रव्यमात्रे इति लक्षणसमन्वयः । अत्र 'जातिमत्त्वम्' एतावदेव उच्यते चेत् सत्ता जातिमादाय गुणकर्मणोः अतिव्याप्तिः । कथम् ? यथा सत्ताजातिमत्त्वं द्रव्ये तथा सत्ताजातिमत्त्वं गुणे कर्मणि च वर्तते इति, तदर्थं सत्ताभिन्नेति पदम् सत्ताया व्यावृत्तिः तथापि गुणत्वं कर्मत्वं चादाय उक्तस्थलेऽतिव्याप्तेस्तादवस्थ्यमेव, कथम् ? यथा सत्ताभिन्ना या द्रव्यत्वरूपा जातिः तद्वत्त्वं वर्तते द्रव्ये, तथा सत्ताभिन्ना गुणत्वकर्मत्वरूपा जातिः तद्वत्त्वं वर्तते गुणे कर्मणि च इति तत्रातिव्याप्तिः, तदर्थं **गुणसमानाधिकरणेति । नन्वेवमपी**त्यादि । ***ननु*** रूपं गुणः, तत्र एकत्वं सङ्ख्या वर्तते, तथा रसावधिकं पृथक्त्वमपि तत्र विद्यते, सङ्ख्यापृथकत्वे च गुणा स्तः, ततो रूपत्वजातिः गुणसमानाधिकरणा जाता, तेन रूपादौ अतिव्याप्तिः, ***अत्रोच्यते***-ऐकाधिकरण्यादेव तादृशस्य व्यवहारस्योपपत्तिः, न तु गुणे गुणसद्भावः । एकार्थः एकाधिकरणं घटादि, तत्र रूपं वर्तते सङ्ख्यापृथक्त्वेऽपि तत्रैव तिष्ठतः । एवं च एकार्थे द्वयोस्त्रयाणां वा समवायोऽस्ति, न तु रूपे गुणयोः समवायः । घटादिगतमेव एकत्वादिकं रूपेऽपि लक्ष्यते इत्यर्थः, अतो नोक्तदोषः ॥

[गुणविभागः]

**रूप-रस-गन्ध-स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोगविभाग-परत्वा-ऽपरत्व-गुरुत्व-द्रवत्व-स्नेह-शब्द-बुद्धि-सुख-दुःखेच्छाद्वेष-प्रयत्न-धर्मा-ऽधर्म-संस्कारा-श्चतुर्विंशतिर्गुणाः ।**

**गुणं विभजते-रूपेति । द्रव्यकर्मभिन्नत्वे सति सामान्यवान्**



**गुणः, गुणत्वजातिमान् वा । लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात् कथं चतुर्विंशतिर्गुणा इति चेत् ? न, लघुत्वस्य गुरुत्वाभावरूपत्वात्, मृदुत्वकठिनत्वयोः अवयवसंयोगविशेषरूपत्वात् ।**

[कर्मविभागः]

**उत्क्षेपणा-ऽपक्षेपणा-ऽऽकुञ्चन-प्रसारण-गमनानि पञ्च कर्माणि ।**

**कर्म विभजते-उत्क्षेपणेति । संयोगिभिन्नत्वे सति संयोगासमवायिकारणं कर्म, कर्मत्वजातिमद् वा । ननु भ्रमणादेरपि अतिरिक्तस्य कर्मणः सत्त्वाद् पञ्चेत्यनुपपन्नमिति चेत् ? न, भ्रमणादीनामपि गमने अन्तर्भावात् न पञ्चत्वविरोधः ॥**

कर्मलक्षणमाह-**संयोगे**त्यादि । अङ्गुलीद्वयसंयोगस्य समवायिकारणम् अङ्गुलीद्वयम्, असमवायिकारणं तु तन्निष्ठं कर्म, कार्येण अङ्गुलीद्वयसंयोगेन एकस्मिन्नर्थे अङ्गुलीद्वये समवेतत्वात् ॥

[सामान्यविभागः]

**परमपरं चेति द्विविधं सामान्यम् ।**

**सामान्यं विभजते-परमिति । परम्-अधिकदेशवृत्ति, अपरं-न्यूनदेशवृत्ति । सामान्यादिचतुष्टये जातिर्नास्ति ॥**

[विशेषविभागः]

**नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।**

**विशेषं विभजते-नित्येति । पृथिव्यादिचतुष्टयस्य परमाणवः आकाशादिपञ्चकं च नित्यद्रव्याणि ॥**

[समवायविभागः]

**समवायस्त्वेक एव ।**

**समवायस्य भेदो नास्तीत्यत आह-समवायस्त्विति ॥**

[अभावविभागः]

## अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।

**अभावं विभजते-अभाव इति ॥**

[पृथिवीनिरूपणम्]

## तत्र गन्धवती पृथिवी । सा द्विविधा । नित्याऽनित्या च । नित्या परमाणुरूपा । अनित्या कार्यरूपा ।

## पुनस्त्रिविधा । शरीरेन्द्रियविषयभेदात् । शरीरमस्मदादीनाम् । इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति । विषयो मृत्पाषणादिः ।

तत्रोद्देशक्रमेण क्रमानुसारेण प्रथमं पृथिव्याः लक्षणमाह-**गन्धवतीति** । नाम्ना पदार्थसङ्कीर्तनमुद्देशः । उद्देशक्रमे च सर्वत्र इच्छैव नियामिका ।

**ननु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गन्धानुत्पादाद् अव्याप्तिः । न च गन्धप्रतीत्यनुपपत्तिरिति वाच्यम्, अवयवगन्धस्यैव तत्र भानसम्भवेन चित्रगन्धानङ्गीकारात् । किञ्च-उत्पन्नविनष्टघटादौ अव्याप्तिः इति चेत् ? न, गन्धसमानाधिकरणद्रव्यत्वापरजातिमत्त्वस्य विवक्षितत्वात् ।**

**ननु जलादावपि गन्धप्रतीतेः अतिव्याप्तिः इति चेत् ? न, अन्वयव्यतिरेकाभ्यां पृथिवीगन्धस्यैव तत्र भानाङ्गीकारात् । ननु तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां तत्रातिव्याप्तिः इति चेत् ? न,**



**सर्वाधारताप्रयोजकसम्बन्धभिन्नसम्बन्धेन लक्षणस्याभिमतत्वात् ।**

**पृथिवीं विभजते-सा द्विविधेति । नित्यत्वं ध्वंसाप्रतियोगित्वम् । ध्वंसप्रतियोगित्वम् अनित्यत्वम् । प्रकारान्तरेण विभजते पुनरिति । आत्मनो भोगायतनं शरीरम् । यदवच्छिन्नात्मनि भोगो जायते तद् भोगायतनम् । सुखदुःखान्यतरसाक्षात्कारो भोगः । शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् इन्द्रियत्वम् । शरीरेन्द्रियभिन्नो विषयः । एवं च गन्धवच्छरीरं पार्थिवशरीरम्, गन्धवदिन्द्रियं पार्थिवेन्द्रियम्, गन्धवान् विषयः पार्थिवविषयः, इति तल्लक्षणं बोध्यम् । पार्थिवं शरीरं दर्शयति-शरीरमिति । पार्थिवेन्द्रियं दर्शयति-इन्द्रियमिति । गन्धग्राहकमिति प्रयोजनकथनम् । घ्राणमिति सञ्ज्ञा । नासाग्रेति आश्रयोक्तिः एवमुत्तरत्र ज्ञेयम् । पार्थिवविषयं दर्शयति-मृत्पाषाणेति ॥**

अथ यावद् उद्देशलक्षणपरीक्षाः न क्रियन्ते तावद् पदार्थानां बोधो न भवतीति वचनात् आदौ उद्देशं विधाय तत्क्रमानुसारेण पृथिव्या लक्षणमाह-**गन्धवती**ति । किं नाम उद्देशत्वम् ? नाममात्रेण पदार्थसङ्कीर्तनत्वम् उद्देशत्वम् । ताल्वोष्टपुटव्यापारेणोच्चारणं सङ्कीर्तनम् । इह वंशे पाट्यमाने दलद्वयविभागजन्यचटचटशब्दे अतिव्याप्तिवारणाय 'सं' पदम् । काकरवे अतिव्याप्तिवारणाय नामपदम् । वन्ध्यापुत्रे अतिव्याप्तिवारणाय पदार्थपदम् । लक्षणवाक्ये अतिव्याप्तिवारणाय मात्रपदम् ।

तथा असाधारणधर्मो लक्षणम् । असाधारणत्वं नाम लक्ष्यतावच्छेदकसमनियतत्वम् । लक्ष्यतावच्छेदकसमनियतत्वं नाम लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यतावच्छेदकव्यापकत्वम् । यावन्ति लक्षणानि तानि सर्वाण्यपि लक्ष्याणि, तेषां लक्षणमिदम् ।

अथ पृथिव्या लक्षणं गन्धः, तत्रेदं लक्षणमानेयम्-तथा हि- अत्र पृथिवीम् उद्दिश्य गन्धवत्त्वं तस्या लक्षणं विधीयते । कुतः ? लक्ष्यमुद्दिश्य लक्षणस्य प्रवृत्तेः । यदुद्दिश्य लक्षणं क्रियते तल्लक्ष्यम् इति कृत्वा लक्ष्या

पृथिवी, लक्ष्यता पृथिव्यां, लक्ष्यतावच्छेदकं पृथिवीत्वम् । यत्र यत्र गन्धस्तत्र तत्र पृथिवीत्वम् इति कृत्वा गन्धे लक्ष्यतावच्छेकव्याप्यत्वं वर्तते । एवं यत्र यत्र लक्ष्यतावच्छेदकं पृथिवीत्वं तत्र तत्र गन्ध इति कृत्वा गन्धे लक्ष्यता-वच्छेदकव्यापकत्वमपि वर्तते इति । **'व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनम्'** इति वचनाद् व्यावर्तकस्यैव=इतरभेदानुमापकस्यैव लक्षणत्वे सति व्यावृत्तौ अभिधेयत्वादौ चातिव्याप्तिः । कथम् ? पृथिवी इतरेभ्यो भिद्यते, इतरभिन्नत्वाद् एषा व्यावृत्तिः । इह च यत्र यत्र पृथिवीतरभेदः तत्र तत्र लक्ष्यतावच्छेदकं पृथिवीत्वमिति कृत्वा व्यावृत्तौ लक्ष्यतावच्छेदकव्याप्यत्वं वर्तते । एवं यत्र यत्र लक्ष्यतावच्छेदकं पृथिवीत्वं तत्र तत्र पृथिवीतरभेदः इति कृत्वा व्यावृत्तौ लक्ष्यतावच्छेदकव्यापकत्वमपि वर्तते इति तत्रातिव्याप्तिः । व्यावृत्तेर्व्यावर्तकत्वं नास्तीत्यतोऽलक्ष्यत्वम् । एवमभिधेयत्वेऽपि-यथा पदार्था इतरेभ्यो भिद्यन्ते अभिधेयत्वात् । इह च यत्र यत्र अभिधेयत्वं तत्र तत्र लक्ष्यतावच्छेदकं पदार्थत्वम्, इति अभिधेयत्वे लक्ष्यतावच्छेदकव्याप्यत्वं वर्तते । एवं यत्र यत्र लक्ष्यतावच्छेकव्यापकं पदार्थत्वं तत्र तत्र अभिधेयत्वम् इति अभिधेयत्वे लक्ष्यतावच्छेदकव्यापकत्वमपि वर्तते इति कृत्वा तत्रातिव्याप्तिः । अस्यापि व्यावर्तकत्वं नास्ति अतोऽलक्ष्यत्वं, ततश्च तयोरतिव्याप्तिवारणाय तद्भिन्नत्वं विशेषणं देयम् । तथा च व्यावृत्तिभिन्नत्वे सति, अभिधेयत्वादि-भिन्नत्वे सति लक्ष्यतावच्छेकसमनियतत्वम् असाधारणत्वम् इति सिद्धम् । व्यवहारस्यापि अयं घटः पृथिवी इति व्यवहर्तव्यः पृथिवीतरभेदात्, तथाऽयं घटः पृथिवी इति व्यवहर्तव्य अभिधेयत्वाद् अन्यघटवद् इत्याद्यनुमानात् तयोरपि लक्ष्यत्वात् ।

अथ परीक्षालक्षणमुच्यते । लक्षितस्य लक्षणमुपपद्यते न वा इति विचारः परीक्षा निर्णय इत्यर्थः । इह विचारः परीक्षा इत्येव उच्यते चेत् मूर्खविचारे अतिव्याप्तिः, तदर्थं लक्षितस्येत्याद्युक्तम् । का वा मूर्खविचारणा ? उच्यते,

**दन्ताः कियन्तः काकस्य, मेषस्याण्डं कियत् पलम् ।**
**गर्दभस्य कियल्लिङ्गम्, एषा मूर्खविचारणा ॥१॥** इत्यादि ।

**गन्धसमानाधिकरणे**त्यादि । गन्धसमानाधिकरणा नाम गन्धाधिकरणे



वर्तमाना, अथ च **द्रव्यत्वापरा**=द्रव्यत्वव्याप्या-द्रव्यत्वापेक्षया न्यूनदेशवर्तिनी एतादृशी या जातिः पृथिवीत्वरूपा जातिः, तद्वत्त्वं वर्तते पृथिव्याम् इति कृत्वा लक्षणसङ्गतिः । अतः परं तादृशजातेः तत्रापि सत्त्वान्नातिव्याप्तिः । अत्र जातिमत्त्वम् इति उच्यते चेत्, सत्ताजातिमादाय जलादौ गुणकर्मणोश्च अतिव्याप्तिः, तदर्थं **'द्रव्यत्वापरा'** इति पदम् । अतः परं गुणकर्मणोर्नातिव्याप्तिः परं जलादौ अतिव्याप्तेः तादवस्थ्यम् एव, तदर्थं **गन्धसमानाधिकरणे**ति । गन्धसमानाधि-करणत्वं, गन्धाधिकरणवर्तित्वम् । अथ सम्बन्धो निवेशनीयःसमवायसम्बन्धेन गन्धाधिकरणं पृथिवी, तत्र वर्तित्वम् । ***ननु*** तत्र कालिकसम्बन्धेन जलत्वमपि वर्तते ततो जलेऽतिव्याप्तिः ? ***अत्रोच्यते***-'समवायसम्बन्धेन गन्धाधिकरणे समवायसम्बन्धेन वर्तित्वम् इति गन्धसमानाधिकरणार्थो विवक्षितः,' तेन न दोषः । **नन्विति**-'सुरभिजलम्' इत्यत्र यत्र यत्र गन्धप्रतीतिसत्त्वं तत्र तत्र पृथिवीसम्बन्धसत्त्वम्, यत्र यत्र पृथिवीसम्बन्धाभावः तत्र तत्र गन्धप्रतीत्यभावः, इति अन्वयव्यतिरेकाभ्यां पृथिवीगन्ध एव भासते नान्य इत्यर्थः ।

**यदवच्छिन्ने**ति-शरीरावच्छिन्नेत्यर्थः । तेन घटाद्यवच्छेदेन सत्यप्यात्मनि तत्र भोगाभावात् न तद्भोगायतनमित्यर्थः ।

इन्द्रियलक्षणमाह **( शब्देतरोद्भूतेति )** । शब्दाद् इतरे ये उद्भूता विशेषगुणाः रूपादयः तदनाश्रयत्वं वर्तते मनसि, अथ च ज्ञानस्य कारणीभूतो यो मनःसंयोगः-आत्ममनःसंयोगः तदाश्रयत्वमपि वर्तते, इति कृत्वा मनसि लक्षणसमन्वयः । एवं शब्देतरोद्भूतविशेषगुणा रूपादयः अनाश्रयत्वं वर्तते चक्षुरादौ, अथ च ज्ञानस्य कारणीभूतो यो मनःसंयोगः चक्षुरादिमनःसंयोगः, तदाश्रयत्वं वर्तते चक्षुरादौ, इति कृत्वा चक्षुरादौ सर्वत्र लक्षणं बोध्यम् । अत्र श्रोत्रेन्द्रियेऽव्याप्तिवारणाय **शब्देतरेति ।** उद्भूतविशेषगुणः शब्दः श्रोत्रे, तदनाश्रयत्वं नास्ति । अत्र 'उद्भूत'पदं नोच्यते चेत् चक्षुरादौ अव्याप्तिः, कथम् ? शब्दाद् इतरे ये विशेषगुणा रूपादयः, तदनाश्रयत्वं नास्ति, चक्षुरादीनाम् अनुद्भूत-रूप(व)त्त्वात् । अथ 'विशेष' पदं नोच्यते चेत् चक्षुरादौ असम्भवः । कथम् ? शब्दाद् इतरे उद्भूतगुणाः के ? संयोगादयः, तदनाश्रयत्वं नास्ति । अत्र आत्मन्यतिव्याप्तिवारणाय **शब्देतरे**त्यादि सत्यन्तं पदम् । यद्यपि आत्मनि ज्ञानस्य कारणीभूतो यो मनःसंयोगः आत्ममनःसंयोगः, तदाश्रयत्वं वर्तते तथापि

शब्देतरोद्भूतविशेषगुणानाश्रयत्वं नास्ति । कालदिशोः अतिव्याप्तिवारणाय विशेष्यदलम् । अथ पुनः कालादौ अतिव्याप्तिवारणाय ज्ञानकारणपदम् । कालमनःसंयोगो ज्ञानकारणं न भवति । अथ मनःपदं नोच्यते चेत् इन्द्रियावयवे अतिव्याप्तिः । इन्द्रियावयवविषयसंयोगोऽपि ज्ञानकारणं भवति, परं तत्र मनःसंयोगो नास्ति । ***ननु*** इन्द्रियत्वं जातिर्वा उपाधिर्वा ? ***उच्यते,*** इन्द्रियत्वं जातिर्नास्ति, सङ्करात् यदाह **उदयनाचार्यः** जातिलक्षणसङ्ग्रहे **'यत्र सङ्करस्तत्र जातिर्न'** [ ] इति । सङ्करः किम् ? उच्यते परस्परात्यन्ताभावसमानाधि-करणयोर्धर्मयोरेकत्र समावेशः सङ्करः । यथा-इन्द्रियत्वात्यन्ताभाववति तेजसि तेजस्त्वं वर्तते, तेजस्त्वात्यन्ताभाववति इन्द्रिये इन्द्रियत्वं वर्तते, चक्षुरिन्द्रिये उभयोरपि समावेशः । एवमन्यत्रापि । जातिभिन्नो धर्म उपाधिः ॥

[जलनिरूपणम्]

**शीतस्पर्शवत्य आपः । ता द्विविधाः । नित्याः अनित्याश्च । नित्याः परमाणुरूपाः । अनित्याः कार्य-रूपाः ।**

**पुनस्त्रिविधाः शरीरेन्द्रियविषयभेदात् । शरीरं वरुण-लोके । इन्द्रियं रसनं जिह्वाग्रवर्ति । विषयः सरित्स-मुद्रादिः ॥**

**अपां लक्षणमाह-शीतेति । उत्पन्नविनष्टे जले अव्याप्ति-वारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यम् । 'शीतं शिलातलम्' इत्यादौ जलसम्बन्धादेव शीतस्पर्शभानम् इति नातिव्याप्तिः । अन्यत् सर्वं पूर्वरीत्या व्याख्येयम् ॥**

[तेजोनिरूपणम्]

**उष्णस्पर्शवत् तेजः । तच्च द्विविधम् । नित्यम् अनित्यं च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् ।**



**पुनस्त्रिविधम् । शरीरेन्द्रियविषयभेदात् । शरीर-मादित्यलोके प्रसिद्धम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधः । भौम-दिव्यौदर्याकर-जभेदान् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ॥**

**तेजसो लक्षणमाह-उष्णस्पर्शवदिति । 'उष्णं जलम्' इति प्रतीतेः तेजःसम्बन्धानुविधायित्वात् नातिव्याप्तिः । विषयं विभजते-भौमेति ।**

**ननु सुवर्णं पार्थिवं, पीतत्वाद्, गुरुत्वाद्, हरिद्रावद् इति चेत् ? न, अत्यन्तानलसंयोगे सति घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृते द्रवत्वनाशादर्शनेन, असति प्रतिबन्धके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधाणात् । सुवर्णस्य अत्यन्तानलसंयोगे सति अनुच्छिद्यमानद्रवत्वाधिकरणेन पार्थिवत्वानुपपत्तेः । तस्मात् पीतद्रव्य-द्रवत्वनाशप्रतिबन्धकतया द्रवद्रव्यान्तरसिद्धौ नैमित्तिकद्रवत्वाधि-करणतया जलत्वानुपपत्तेः रूपवत्तया वाय्वादिष्वनन्तर्भावात् तैजसत्व-सिद्धिः । तस्योष्णस्पर्शभास्वररूपयोः उपष्टम्भकपार्थिवरूपस्पर्शाभ्यां प्रतिबन्धाद् अनुपलब्धिः । तस्मात् सुवर्णं तैजसम् इति सिद्धम् ॥**

***ननु*** इत्यादि । सुवर्णं पार्थिवं, पीतत्वात्, सुवर्णं न तैजसं गुरुत्वात् । एवं हेतुद्वयं योज्यम्, अन्यथा एकवाक्ये हेतुद्वयवैफल्यादित्यर्थः । ***अत्र केचित्*** 'सुवर्णं पार्थिवं पीतत्वे सति गुरुत्वात्, जलेऽतिव्याप्तिवारणाय सत्यन्तम्, उद्यदादित्यालोकेऽतिव्याप्तिवारणाय 'गुरुत्वात्' इति पदमि***त्याहुः'-अत्रोच्यते,*** असति प्रतिबन्धके पार्थिवद्रवत्वनाशत्वावच्छिन्नं प्रति अत्यन्तानलसंयोगत्वेन कारणता, परं सुवर्णे तु सा नास्ति, अतो न सुवर्णं पार्थिवम् । ***ननु*** सुवर्णं तैजसं तर्हि तत्र पीतत्वं गुरुत्वं च कथम् ? उच्यते, तत्र पीतिमगुरुत्वाश्रयीभूतः

पार्थिवभागो वर्तते । ***एवं तर्हि*** अत्यन्तानलसंयोगे सति तत्र द्रवत्वनाशे किं प्रतिबन्धकम् ? ***अत्रोच्यते,*** पीतद्रव्ये यद् द्रवत्वं तस्य नाशे प्रतिबन्धकं किञ्चिद् द्रवद्रव्यान्तरं सिद्धं, तत् तैजसं भवतीत्यर्थः ।

[वायुनिरूपणम्]

**रूपरहितः स्पर्शवान् वायुः । स द्विविधः । नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः ।**

**पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक् सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसञ्चारी वायुः प्राणः । स चैकोऽपि उपाधिभेदात् प्राणाऽपानादिसञ्ज्ञां लभते ॥**

वायुं निरूपयति-रूपरहितेति । आकाशादौ अतिव्याप्तिवारणाय स्पर्शवान् इति । पृथिव्यादौ अतिव्याप्तिवारणाय रूपरहितेति । ननु प्राणस्य कुत्रान्तर्भाव इत्यत आह-शरीरेति । स चेति। एक एव प्राणः स्थानभेदात् प्राणापानादिशब्दैर्व्यवह्रियते इत्यर्थः ।

स्पर्शानुमेयो वायुः । तथाहि-'योऽयं वायौ वाति सति अनुष्णाशीतः स्पर्शो भासते स स्पर्शः क्वचिदाश्रितः-गुणत्वात्, रूपवत्' । न चास्य पृथिवी आश्रयः, उद्भूतस्पर्शवतः पार्थिवस्य उद्भूतरूपवत्त्वनियमात् । न जलतेजसी, अनुष्णाशीतत्वात् । न विभुचतुष्टयम्, सर्वत्रोपलब्धिप्रसङ्गात् । न मनः परमाणुस्पर्शस्यातीन्द्रियत्वात् । तस्माद् यः प्रतीयमानस्पर्शाश्रयः स वायुः । ननु 'वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वाद् घटवत् इति चेत् ? न, उद्भूतरूपवत्त्वस्योपाधित्वात् । यत्र द्रव्यत्वे सति बहिरिन्द्रियप्रत्यक्षत्वं तत्र 'उद्भूतरूपवत्त्वम्' इति घटादौ साध्यव्यापकत्वम् । यत्र प्रत्यक्षस्पर्शाऽऽश्रयत्वं 'तत्र उद्भूतरूपवत्त्वं नास्ति' इति पक्षे साधनाव्यापकत्वम् । न चैवं तप्तवारिस्थतेजसोऽप्यप्रत्यक्षत्वापत्तिः, इष्टत्वात् । तस्माद् रूपरहितत्वाद् वायुरप्रत्यक्षः ॥



[जगत उत्पत्तिविनाशनिरूपणम्]

इदानीं कार्यरूपपृथिव्यादिचतुष्टयस्य उत्पत्तिविनाशक्रमः कथ्यते । ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जायते । ततः परमाणुद्वयसंयोगे सति द्व्यणुकमुत्पद्यते । त्रिभिर्द्व्यणुकैः त्र्यणुकम् । एवं चतुरणुकादिक्रमेण महती पृथिवी, महत्य आपः, महत् तेजः, महान् वायुः उत्पद्यते । एवमुत्पन्नस्य कार्यद्रव्यस्य सञ्जिहीर्षावशात् परमाणुषु क्रिया । क्रियया परमाणुद्वयविभागे सति द्व्यणुकस्य नाशः । ततः त्र्यणुकस्य, ततः चतुरणुकस्य, इत्येवं महापृथिव्यादिनाशः । असमवायिकारणनाशाद् द्व्यणुकनाशः, समवायिकारणनाशात् त्र्यणुकनाशः इति सम्प्रदायः । सर्वत्र असमवायिकारणनाशाद् द्रव्यनाश इति नवीनाः ।

किं पुनः परमाणुसद्भावे प्रमाणम् ? उच्यते । जालसूर्यमरीचिस्थं सूक्ष्मतमं यद् रजो दृश्यते तत्-सावयवं-चाक्षुषद्रव्यत्वात् पटवत् । त्र्यणुकावयवोऽपि सावयवः-महदारम्भकत्वात्, तन्तुवत् । यो द्व्यणुकावयवः, स एव परमाणुः । स च नित्यः । तस्याऽपि कार्यत्वेऽनवस्थाप्रसङ्गात् । तथा च मेरुसर्षपयोरपि तुल्यपरिणाणापत्तेः ।

सृष्टिप्रलयसद्भावे 'धाता यथापूर्वमकल्पयत्' [ ] इति श्रुतिः प्रमाणम् । सर्वकार्यद्रव्यध्वंसोऽवान्तरप्रलयः । सर्वभावकार्यध्वंसो महाप्रलयः इति विवेकः ॥

प्राणः पञ्चधा–

हृदि प्राणो गुदेऽपानः, समानो नाभिमण्डले ।<br>
उदानः कण्ठदेशस्थो व्यानः सर्वशरीरगः ॥ [ ]

लौकिकविषयतासम्बन्धेन बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति समवायसम्बन्धेन उद्भूतरूपत्वेन कारणता । कार्यं बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षं, कार्यता बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे, कार्यतावच्छेदकं बहिरिन्द्रियजन्य-द्रव्यप्रत्यक्षत्वं, कारणम् उद्भूतरूपम्, अग्रे पूर्ववत् । कार्यतावच्छेदकः सम्बन्धः, [कार्यतावच्छेदको] वा लौकिकविषयतासम्बन्धः, कारणतावच्छेदको वा समवायसम्बन्धः । वायौ उद्भूतरूपाभावात् प्रत्यक्षज्ञानं नास्ति । **ननु वायुः प्रत्यक्ष** इत्यादि । अत्र उद्भूतरूपवत्त्वम् उपाधिः । को वायम् उपाधिः ? पक्षधर्मावच्छिन्नसाध्यव्यापकः । पक्षधर्मः को वा ? बहिर्द्रव्यत्वम्, यत्र यत्र बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं, तत्र तत्र उद्भूतरूपवत्त्वं, यथा बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं वर्तते घटादौ, तत्र उद्भूतं रूपं वर्तते, इति उद्भूतरूपस्य साध्यव्यापकत्वम् । पक्षे साधनाव्यापकत्वं कथम् ? साधनं किं भवति ? प्रत्यक्षस्पर्शाश्रयत्वं, तद् वायौ वर्तते, तत्र उद्भूतरूपं नास्ति, एवं साधना-व्यापकत्वम् । **न चेति** तप्तवारिस्थं तेजः प्रत्यक्षं प्रत्यक्षस्पर्शाश्रयत्वादिति।

**ईश्वरस्येति** । यदा ईश्वरस्य चिकीर्षा जायते तदा परमाणुषु क्रिया समुत्पद्यते । ***ननु*** ईश्वरेच्छा नित्या, तर्हि कथं जायते इति, उच्यते ? इच्छा तु सर्वदाऽस्त्येव, परं फलोन्मुखा जायते इत्यर्थो बोध्यः । **त्रिभिर्द्व्यणुकैः** इति । ***ननु*** सर्वत्र द्वाभ्यामेव व्यवहारः, त्रिभिरिति कथम् ? ***उच्यते*** त्र्यणुकेऽपकृष्टं महत्त्वं वर्तते, तद् बहुत्वजन्यं भवति । द्वाभ्यां तु बहुत्वं न स्यात् यत्रावयवेषु बहुत्वं तत्रावयविन्यपि बहुत्वं स्यादित्यर्थः । **द्व्यणुकनाश** इति । द्व्यणुकनाश-त्वावच्छिन्नं प्रति परमाणुद्वयसंयोगनाशत्वेन कारणता, त्र्यणुकादिनाशत्वावच्छिन्नं प्रति द्व्यणुकादिनाशत्वेन कारणता इति **प्राञ्चः । मह**दिति । महतः आरम्भको महान् तन्तुर्यथा महतः पटस्य आरम्भकस्तथा त्र्यणुकावयवोऽपि महतस्त्र्य-णुकस्यारम्भकः । ***ननु*** परमाणौ नित्यत्वं वा कार्यत्वम् ? अत्रोच्यते, नित्यत्वं वर्तते । कार्यत्वे सति अनवस्थादोषप्रसङ्गः स्यात् । कथम् ? कार्यत्वं सावयवत्वव्याप्यं भवति, ततश्च परमाणोः सावयवत्वे तदवयवस्यापि सावयवत्वम् इत्येवमनवस्था स्यात् । **सृष्टी**ति सृष्टिसद्भावे प्रलयसद्भावे च प्रमाणं श्रुतिः **यथा धाते**त्यादि । धाता यथा सृष्टिं पूर्वमकल्पयत् तथा साम्प्रतमपि । एतेन मध्ये प्रलयः सूचितः । प्रलयो द्विविधः । **सर्वे**ति ।



द्रव्यपदेन पृथिव्याः परमाणुगतरूपादीनां पाकजानामपि ध्वंसो न इत्यर्थो बोध्यः, महाप्रलये तु तेषामपि नाशः । ततः सर्वं शून्यमेव तिष्ठति । तादृशः प्रलयो न इत्येके ॥

[आकाशनिरूपणम्]

## शब्दगुणकम् आकाशम् । तच्चैकं विभु नित्यं च ।

**आकाशं लक्षयति-शब्दगुणकमिति । ननु किमाकाशं पृथिव्यादिवन्नाना ? नेत्याह-तच्चैकमिति । भेदे प्रमाणाभावा-दित्यर्थः । एकत्वादेव सर्वत्रोपलब्धेर्विभुत्वमङ्गीकर्तव्यमित्याह-विभ्विति । सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वम् । मूर्तत्वं परिच्छिन्न-परिमाणवत्त्वं क्रियावत्त्वं वा । विभुत्वादेव आत्मवत् नित्यत्वमित्याह -नित्यं चेति ।**

**मूर्तेति**-पृथिव्यप्तेजोवायुमनांसि मूर्तद्रव्याणि । मनःस्थाने आकाशे उक्ते तु पञ्चभूतानि स्युः ॥

[कालनिरूपणम्]

## अतीतादिव्यवहारहेतुः कालः । स चैको विभु-र्नित्यश्च ।

**कालं लक्षयति-अतीतेति । सर्वाधारः कालः सर्वकार्ये निमित्त कारणं च ।**

**काल** इति-कार्यत्वावच्छिन्नं प्रति कालत्वेन कारणता ।

[दिङ्-निरूपणम्]

## प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका विभ्वी नित्या च ।

**दिशो लक्षणमाह-प्राचीति । दिगपि कार्यमात्रे निमित्त-कारणम् ।**

[आत्मनिरूपणम्]

**ज्ञानाधिकरणमात्मा । स द्विविधः । परमात्मा जीवात्मा चेति । तत्रेश्वरः सर्वज्ञः परमात्मा एक एव । जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।**

**आत्मनो लक्षणमाह-ज्ञानेति । आत्मानं विभजते-स द्विविध इति । परमात्मनो लक्षणमाह-तत्रेति । नित्यज्ञानाधिकरणत्वम् ईश्वरत्वम् । नन्वीश्वरस्य सद्भावे किं प्रमाणम् ? न तावत् प्रत्यक्षम्, तद्धि बाह्यमाभ्यतरं वा ? नाद्यम्, अरूपिद्रव्यत्वात् । नान्त्यम्, आत्मसुखादिव्यतिरिक्तत्वात् । नाप्यनुमानम्, लिङ्गाभावात् । नाप्यागमः तथाविधागमाभावात् इति चेत् ? न, 'क्षित्यङ्कुरादिकं, कर्तृजन्यं, कार्यत्वाद्-घटवत्' इत्यनुमानस्य प्रमाणत्वात् । उपादान-गोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वम् । उपादानं समवायि-कारणम् । सकलपरमाण्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वम् । 'यः सर्वज्ञः स सर्ववित्' [ ] इत्यागमोऽपि तत्र प्रमाणम् ।**

**जीवस्य लक्षणमाह-जीव इति । सुखादिकं जीवलक्षणम् । ननु 'मनुष्योऽहं' 'ब्राह्मणोऽहम्' इत्यादौ सर्वत्र 'अहम्' प्रत्यये शरीरस्यैव विषयत्वाच्छरीरमेवात्मा इति चेत् ? न, शरीरस्याऽऽत्मत्वे करपादादिनाशे शरीरनाशाद् आत्मनोऽपि नाशापत्तेः । नापि इन्द्रियाणाम् आत्मत्वम् । तथात्वे ''योऽहं घटमद्राक्षं सोऽहमिदानीं स्पृशामि'' इत्यनुसन्धानाभावप्रसङ्गात् । अन्यानुभूतेऽन्यस्यानुसन्धाना-योगात् । तस्माद् देहेन्द्रियव्यतिरिक्तो जीव, सुखादिवैचित्र्यात् प्रतिशरीरं भिन्नः । स च न परमाणुपरिमाणः, शरीरव्यापिसुखाद्य-नुपलब्धिप्रसङ्गात् । न मध्यमपरिमाणः, तथा सति अनित्यत्वप्रसङ्गेन कृतहानाकृताभ्यागमप्रसङ्गात् । तस्मान्नित्यो विभुर्जीवः ।**

**उपादाने**ति । उपादानगोचरं समवायिकारणविषयकं यत् प्रत्यक्षज्ञानम्,



उपादानगोचरा या चिकीर्षा, उपादानगोचरा या कृतिः, तद्वत्त्वं कर्तृत्वम् । **नापीन्द्रियाणा**मिति । पूर्वं घटो दृष्टः, ततो दैवयोगात् चक्षुषी नष्टे, तदनन्तरं पुनरपि तस्यैव घटस्य स्पर्शे सति स वक्ति **योऽह**मिति । यदि इन्द्रियाणामात्मत्वं तर्हि घटस्यानुभवस्तु चक्षुषो जातः, स्मरणं त्वगिन्द्रियस्य न सङ्गच्छते । यथा चैत्रानुभूते मैत्रस्य स्मरणं न स्यादिति ।

[मनोनिरूपणम्]

**सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्म-नियतत्वादनन्तं परमाणुरूपं नित्यं च ।**

**मनसो लक्षणमाह-सुखेति । स्पर्शरहितत्वे सति क्रियावत्त्वं मनसो लक्षणम् । मनो विभजते-तच्चेति । एकैकस्यात्मन एकैकं मन आवश्यकम् इति आत्मनामनेकत्वान्मनसामप्यनेकत्वम् इत्यर्थः । परमाणुरूपमिति । मध्यमपरिमाणवत्त्वे अनित्यत्वप्रसङ्गाद् इत्यर्थः । ननु 'मनो, विभु, स्पर्शरहितद्रव्यत्वाद् इति चेत् ? न, मनसो विभुत्वे आत्ममनःसंयोगास्यासमवायिकारणस्याभावाद् ज्ञानानुत्पत्तिप्रसङ्गात् । न च विभुद्वयसंयोगोऽस्तु इति वाच्यम्, तत्संयोगस्य नित्यत्वेन सुषुप्त्यभावप्रसङ्गात् । पुरीतदव्यतिरिक्तप्रदेशे आत्ममनःसंयोगस्य सर्वदा विद्यमानत्वात् । अणुत्वे तु यदा मनः पुरीतति नाड्यां प्रविशति तदा सुषुप्तिः, यदा निःसरति तदा ज्ञानोत्पत्तिः, इत्यणुत्वसिद्धिः ।**

[इति द्रव्याणि]

**सुखेति**-सुखाद्युपलब्धिसाधनत्वे सति इन्द्रियत्वं मनसो लक्षणम् । आत्मन्यव्याप्तिवारणाय **इन्द्रिये**ति । चक्षुरादौ अतिव्याप्तिवारणाय पूर्वदलम् । **आत्ममनःसंयोग** इति । कार्यं ज्ञानं तेन सह एकस्मिन्नात्मनि समवेतत्वे सति कारणम् आत्ममनःसंयोगः । ज्ञानत्वावच्छिन्नं प्रति पुरीततिबहिर्देशा-वच्छिन्नात्ममनःसंयोगत्वेन कारणता, पुरीतत्यन्तर्देशावच्छिन्नसंयोगत्वेन नेत्यर्थः इति द्रव्याणि ॥

[रूपनिरूपणम्]

**चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्ल-नील-पीत-रक्त-कपिश-चित्र-भेदात् सप्तविधम् । पृथिवी-जलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।**

**रूपं लक्षयति-चक्षुरिति । सङ्ख्यादौ अतिव्याप्तिवारणाय 'मात्र'पदम् । रूपत्वे अतिव्याप्तिवारणाय 'गुण'पदम् । प्रभा-भित्तिसंयोगे अतिव्याप्तिवारणाय-चक्षुर्मात्रग्राह्यजातिमत्त्वं वाच्यम् ।**

**रूपं विभजते-तच्चेति । नन्वव्याप्यवृत्ति नीलादिसमुदाय एव चित्ररूपम् इति चेत् ? न, रूपस्य व्याप्यवृत्तित्वनियमात् । ननु चित्रपटे अवयवरूपस्य प्रतीतिरस्तु इति चेत् ? न, रूपरहितत्वेन पटस्य अप्रत्यक्षत्वप्रसङ्गात् । न च रूपवत् समवेतं प्रत्यक्षत्वप्रयोजकं, गौरवात् । तस्मात् पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धिः । रूपस्याश्रयमाह-पृथिवीति । आश्रयं विभज्य दर्शयति-तन्नेति ।**

अथ उद्देशक्रमप्राप्तान् गुणान् विभजते-**चक्षु**रिति । चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपलक्षणम् । अत्र ग्रहधातोर्ज्ञानरूपोऽर्थः । अग्रे समागतस्य '**कुहलोर्ण्यत्**' इति ण्यत्प्रत्ययस्य विषयरूपोऽर्थः । **चक्षुर्मात्र**शब्दः चक्षुर्मात्रजन्ये लाक्षणिकः । तत एवं वाच्यं-चक्षुर्मात्रजन्यग्रहविषयत्वे सति गुणः । ***ननु*** गुणत्वमित्येवास्तु चक्षुरित्यादि सत्यन्तं पदं माऽस्तु इति चेत् ? ***न,*** रूपातिरिक्तत्रयोविंशतिगुणेषु अतिव्याप्तिप्रसङ्गात् । ***ननु*** गुणपदं माऽस्तु इति चेत् ? ***न,*** येन येन इन्द्रियेण ये ये गुणा गृह्यन्ते तेन तेन तद्गता जातयस्तदभावाश्च इति न्यायात् रूपत्वे रूपाभावे चातिव्याप्तिप्रसङ्गात् । तथा मात्रपदोपादानं तु सङ्ख्यादावतिव्याप्तिवारणाय कृतम् । मात्रशब्दं पृथक्कृत्य अयमर्थो विधेयः-चक्षुरितरबहिरिन्द्रियजन्यग्रहाविषयत्वे सति चक्षुर्जन्य-ग्रहविषयत्वे सति गुणत्वं रूपलक्षणम् । सङ्ख्यादौ चक्षुरितर-



बहिरिन्द्रियजन्यग्रहस्याविषयत्वं नास्ति । चक्षुषः सकाशाद् इतरद् बहिर्द्रव्यं किं भवति ? त्वगादिकम्, तज्जन्यो यो ग्रहो ज्ञानं, तस्य विषयत्वं वर्तते । अन्यैरिन्द्रियैः कृत्वापि सङ्ख्यादिबोधो भवतीत्यर्थः । अतो नातिव्याप्तिः अथैवमुच्यते चेत् प्रभाभित्तिसंयोगेऽतिव्याप्तिः, तदर्थं 'विशेष'पदं वाच्यम् । ततः किंलक्षणम् ? चक्षुरितरबहिरिन्द्रियजन्यग्रहाविषयत्वे सति चक्षुर्जन्य-ग्रहविषयत्वे सति विशेषगुणत्वं रूपलक्षणम् । संयोगस्तावत् सामान्यगुणः इति कृत्वा तत्र नातिव्याप्तिः । ***ननु*** विशेषपदेनैव सङ्ख्यादावपि अतिव्याप्त्यभावो भविष्यति सङ्ख्यादेः सामान्यगुणत्वात् ततस्तदर्थं 'मात्र'पदग्रहणं व्यर्थमिति चेत् ? ***न,*** मात्रपदं नोच्यते चेत् सांसिद्धिकद्रवत्वे अतिव्याप्तिः स्यात्, तस्मिन् उक्ते तु तस्य विशेषगुणत्वेऽपि चक्षुरितर-बहिरिन्द्रियजन्यज्ञानस्य अविषयत्वं नास्ति, अतो नातिव्याप्तिः । अथ अस्मिन् लक्षणे चक्षुःपदं नोच्यते चेद् रूपेऽसम्भवदोषः स्यात् । कथम् ? तदाह-त्वगादेः सकाशादितरद् बहिरिन्द्रियं किं भवति ? चक्षुः, तज्जन्यो यो ग्रहो ज्ञानं तद्विषयत्वं वर्तते रूपे न तु तदविषयत्वमित्यसम्भवः । अथ बहिःपदं नोच्यते चेत् पुनरपि रूपे असम्भवः । कथम् ? चक्षुषः साक्षादितरद् इन्द्रियं किं भवति ? मनः, तज्जन्यग्रहाविषयत्वं रूपे नास्ति अतोऽसम्भवः । अथेन्द्रियपदं नोच्यते चेत् पुनरपि रूपेऽसम्भवः । कथम् ? चक्षुषः सकाशाद् इतरो बहिः किं भवति ? कालः, तज्जन्यग्रहाविषयत्वं नास्ति, अतोऽसम्भवः । अथ द्वितीये सत्यन्तपदे चक्षुःपदं नोच्यते चेत् धर्माधर्मयोरतिव्याप्तिः, तयोरात्मगुणत्वात्, तदर्थं चक्षुःपदं वाच्यमेव । ***ननु*** अस्मिन् लक्षणे क्रियमाणे रूपेऽसम्भवदोषस्य तु तादवस्थ्यमेवास्ति । कुतः ? चक्षुषः सकाशादितरद् इन्द्रियं त्वगादि, तज्जन्यं ज्ञानं कीदृग् भवति ? गुणत्वरूपसामान्यलक्षणप्रत्यासत्त्या गुणत्वविशिष्टाः सर्वे गुणा इत्याकारकम् अलौकिकं ज्ञानं भवति, रूपे तु तद्विषयत्वं वर्तते, अतो असम्भवः इति चेद् ***उच्यते,*** चक्षुरितरबहिरिन्द्रियजन्यलौकिकप्रत्यक्षाविषयत्वे सति चक्षुर्जन्यलौकिकप्रत्यक्षविषयत्वे सति विशेषगुणत्वं रूपलक्षणमित्य-भिमतत्वान्न दोषः । [इति रूपनिरूपणम्]

(रसमारभ्य पृथक्त्वपर्यन्तं फक्किकाकारेण न किञ्चिद् लिखितम् )

[रसनिरूपणम्]

**रसनग्राह्यो गुणो रसः । स च मधुराऽऽम्ललवण कटु-कषायतिक्तभेदात् षड्विधः । पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।**

रसं लक्षयति-रसनेति । रसत्वे अतिव्याप्तिवारणाय गुणपदम् । रसस्याश्रयमाह-पृथिवीति । आश्रयं विभज्य दर्शयति पृथिव्यामिति ।

[गन्धनिरूपणम्]

**घ्राणग्राह्यो गुणो गन्धः । स च द्विविधः सुरभिर-सुरभिश्च । पृथिवीमात्रवृत्तिः ।**

गन्धं लक्षयति-घ्राणेति । गन्धत्वे अतिव्याप्तिवारणाय गुणपदम् ।

[स्पर्शनिरूपणम्]

**त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः । स च त्रिविधः । शीतोष्णाऽनुष्णाऽशीतभेदात् । पृथिवीजल-तेजोवृत्तिः । तत्र शीतो जले । उष्णस्तेजसि । अनुष्णा-शीतः पृथिवीवाय्वोः ।**

स्पर्शं लक्षयति-त्वगिति । स्पर्शत्वे अतिव्याप्तिवारणाय गुणपदम् । संयोगादौ अतिव्याप्तिवारणाय मात्रपदम् ।

[पाकजनिरूपणम्]

**रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यं च । अन्यत्रा-**



**पाकजं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्य-गतमनित्यम् ।**

पाकजमिति । पाकः-तेजःसंयोगः । तेन पूर्वरूपं नश्यति, रूपान्तरमुत्पद्यते इत्यर्थः । अत्र परमाणुष्वेव पाको, न त्र्यणुकादौ । आमपाकनिक्षिप्ते घटे परमाणुषु रूपान्तरोत्पत्तौ श्यामघटनाशे पुनर्द्व्यणुकादिक्रमेण रक्तघटोत्पत्तिः । तत्र परमाणवः समवायि-कारणम्, तेजःसंयोगोऽसमवायिकारणम्, अदृष्टादिकं निमित्त-कारणम् । द्व्यणुकादिरूपे 'कारणरूपम् असमवायिकारणम्' इति पीलुपाकवादिनो वैशेषिकाः । 'पूर्वघटनाशं विनैव अवयविनि अवयवेषु परमाणुपर्यन्तेषु च युगपद्रूपान्तरोत्पत्तिः इति पिठरपाक-वादिनो नैयायिकाः । अत एव पार्थिवपरमाणुषु रूपादिकमनित्यम् इत्यर्थः । अन्यत्रेति जलादौ इत्यर्थः । नित्यगतमिति परमाणुगतम् इत्यर्थः । अनित्यगतमिति द्व्यणुकादिनिष्ठम् इत्यर्थः । रूपादिचतुष्टयम् उद्भूतं प्रत्यक्षम् । अनुद्भूतम् अप्रत्यक्षम् । उद्भूतत्वं प्रत्यक्षत्वप्रयोजको धर्मः । तदभावः अनुद्भूतत्वम् ।

[सङ्ख्यानिरूपणम्]

**एकत्वादिव्यवहारहेतुः सङ्ख्या । सा नवद्रव्य-वृत्तिः । एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यमनित्यं च । नित्यगतं नित्यम् । अनित्यगतमनित्यम् । द्वित्वादिकं तु सर्वत्रानित्यमेव ।**

सङ्ख्यां लक्षयति-एकेति ।

[परिमाणनिरूपणम्]

**मानव्यवहाराऽसाधारणं कारणं परिमाणम् । नव-**

**द्रव्यवृत्ति । तच्चतुर्विधम् । अणु, महत्, दीर्घं, ह्रस्वं चेति ।**

परिमाणं लक्षयति-मानेति । परिमाणं विभजते-तच्चेति । भावप्रधानो निर्देशः, अणुत्वं, महत्त्वं, दीर्घत्वं, ह्रस्वत्वं च इत्यर्थः ।

[पृथक्त्वनिरूपणम्]

**पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।**

पृथक्त्वं लक्षयति-पृथगिति । 'इदम् अस्मात्पृथग्' इति व्यवहारकारणम् इत्यर्थः ।

[संयोगनिरूपणम्]

**संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।**

संयोगं लक्षयति-संयुक्तेति । 'इमौ संयुक्तौ' इति व्यवहारहेतुरित्यर्थः । सङ्ख्यादिलक्षणेषु सर्वत्र दिक्कालादौ अतिव्याप्तिवारणाय असाधारणेति देयम् । संयोगो द्विविधः । कर्मजः संयोगजश्च । आद्यो हस्तक्रियया हस्तपुस्तकसंयोगः । द्वितीयो हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः । अव्याप्यवृत्तिः संयोगः । स्वात्यन्ताभावसमानाधिकरणत्वम् अव्याप्यवृत्तित्वम् ।

**अव्याप्यवृत्ति**रिति । स्वात्यन्ताभावाधिकरणवर्तित्वम् अव्याप्यवृत्तित्वम् यथा मूलावच्छेदेन वृक्षे संयोगाभावः, शाखावच्छेदेन संयोगो वर्तते ।

[विभागनिरूपणम्]

**संयोगनाशको गुणो विभागः सर्वद्रव्यवृत्तिः ।**

विभागं लक्षयति-संयोगेति । कालादौ अतिव्याप्तिवारणाय



गुण इति । रूपादौ अतिव्याप्तिवारणाय संयोगनाशक इति । विभागो द्विविधः । कर्मजो विभागजश्च । आद्यो हस्तक्रियया हस्तपुस्तकविभागः । द्वितीयो हस्तपुस्तकविभागात् कायपुस्तकविभागः ।

[परापरत्वनिरूपणम्]

**परापरव्यवहारासाधारणकारणे परत्वाऽपरत्वे । पृथिव्यादिचतुष्टयमनोवर्त्तिनी । ते द्विविधे । दिक्कृते कालकृते च । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ।**

परत्वापरत्वयोर्लक्षणमाह-परापरेति । परव्यवहाराऽसाधारणकारणं परत्वम् । अपरव्यवहाराऽसाधारणकारणम् अपरत्वम् इत्यर्थः । परत्वाऽपरत्वे विभजते-ते द्विविधे इति । दिक्कृतयोः उदाहरणमाह-दूरस्थ इति । कालकृते उदाहरति-ज्येष्ठ इति ।

[गुरुत्वनिरूपणम्]

**आद्यपतनाऽसमवायिकारणं गुरुत्वं । पृथिवीजलवृत्ति ।**

गुरुत्वं लक्षयति-आद्येति । द्वितीयादिपतनस्य वेगासमवायिकारणत्वाद् वेगे अतिव्याप्तिवारणाय आद्येति ।

**आद्यपतने**ति । पतनकर्मणः कारणत्रयम् । तत्र समवायिकारणं-लोष्टादिपिण्डो यत्र समवेतं पतनमुत्पद्यते १॥ तत्र लोष्टादौ यद् गुरुत्वं=भारो वर्तते तदसमवायिकारणम्, लोष्टादिसमवेताद् गुरुत्वादेव तस्योत्पद्यमानत्वात् २॥ निमित्तकारणं च आधाराभावादिकम् ३॥

[द्रवत्वनिरूपणम्]

**आद्यस्पन्दनाऽसमवायिकारणं द्रवत्वम् । पृथिवी-जलतेजोवृत्ति । तद् द्विविधम् । सांसिद्धिकं नैमित्तिकं चेति । सांसिद्धिकं जले । नैमित्तिकं पृथिवीतेजसोः । पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वम् । तेजसि सुवर्णादौ ।**

द्रवत्वं लक्षयति-स्यन्दनेति । स्यन्दनं=प्रस्रवणम् । तेजः-संयोगजं नैमित्तिकम्, तद्भिन्नं सांसिद्धिकम् । पृथिव्यां नैमित्ति-कमुदाहरति घृतादाविति । तेजसि तदाह सुवर्णादाविति ।

**स्यन्दने**ति । कालादौ अतिव्याप्तिवारणाय **असमवायी**ति । कपालसंयोगादौ अतिव्याप्तिवारणाय **स्यन्दने**ति । स्यन्दनं नाम जलादीनां निम्नाभिसर्पणम् । तत्कारणं त्रेधा । तत्र समवायिकारणं जलादि १ असमवायिकारणं च द्रवीभावः, अद्रवस्वभावानां लोष्टादीनां स्यन्दनायोगात् २ सेतुबन्धाभावादिकं निमित्तकारणम् ३॥

[स्नेहनिरूपणम्]

**चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः । जलमात्रवृत्तिः ।**

स्नेहं लक्षयति-चूर्णेति । कालादौ अतिव्याप्तिवारणाय गुण इति । रूपादौ अतिव्याप्तिवारणाय चूर्णादिपिण्डीभावेति ।

[शब्दनिरूपणम्]

**श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधः ध्वन्यात्मको वर्णात्मकश्च । तत्र ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।**



शब्दं लक्षयति-श्रोत्रेति । शब्दत्वे अतिव्याप्तिवारणाय गुण इति । रूपादौ अतिव्याप्तिवारणाय श्रोत्रेति । शब्दस्त्रिविधः-संयोगजो, विभागजः, शब्दजश्चेति । तत्र-आद्यो भेरीदण्डसंयोग-जन्यः । द्वितीयो वंशे वाद्यमाने दलद्वयविभागजन्यश्चटचटशब्दः । भेर्यादिदेशमारभ्य श्रोत्रपर्यन्तद्वितीयादिशब्दाः शब्दजाः ।

**श्रोत्रग्राह्य** इति । ***ननु*** शब्दे क्षणिकत्वं वर्तते, यतः शब्द आद्यक्षणे उत्पद्यते, द्वितीयक्षणे तिष्ठति, तृतीयक्षणे नश्यति । एवं च दूरदेशस्थानां भेर्यादीनां शब्दस्य श्रवणं कथं सङ्गच्छते इति चेद् ? ***उच्यते,*** दूरदेशस्थशब्दमारभ्य कर्णपर्यन्तं शब्दधारा जायते । तत्र वीचितरङ्गन्यायेन उत्तरोतरशब्दं प्रति पूर्वपूर्वशब्दः कारणं भवति । तत्राऽयं शब्दजः शब्दो बोध्यः, तेन नासम्भवः । अत्र नाश्यनाशकभावोऽस्ति, तत्र द्वितीयशब्दः प्रथमस्य नाशकः एवं तृतीयो द्वितीयस्य इत्यादि । ***ननु*** को वा चरमस्य नाशकः ? ***उच्यते,*** चरमशब्द उपान्त्यशब्दस्य नाशकः, उपान्त्यः चरमस्य । एवमन्योन्यं नाश्यनाशकभावो बोध्यः ।

[बुद्धिनिरूपणम्]

**सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभवश्च । संस्कारमात्रजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः । स द्विविधः यथार्थोऽयथार्थश्चेति ।**

बुद्धेर्लक्षणमाह-सर्वेति । कालादौ अतिव्याप्तिवारणाय गुण इति । रूपादौ अतिव्याप्तिवारणाय सर्वव्यवहार इति । 'जानामि' इत्यनुव्यवसायगम्यज्ञानत्वं लक्षणम् इत्यर्थः । बुद्धि विभजते-सेति ।

स्मृतेर्लक्षणमाह-संस्कारेति । भावनाख्यः संस्कारः । संस्कार-ध्वंसेऽतिव्याप्तिवारणाय ज्ञानमिति । घटादिप्रत्यक्षेऽतिव्याप्तिवारणाय संस्कारजन्यमिति । प्रत्यभिज्ञायामतिव्याप्तिवारणाय मात्रेति ।

अनुभवं लक्षयति-तद्भिन्नमिति । स्मृतिभिन्नं ज्ञानमनुभव

**इत्यर्थः । अनुभवं विभजते-स द्विविध इति ।**

**तद्भिन्न**मिति । स्मृतिभिन्नत्वे सति ज्ञानत्वम् अनुभवस्य लक्षणम् । स्मृतावतिव्याप्तिवारणाय सत्यन्तम् । घटादौ अतिव्याप्तिवारणाय ज्ञानपदम् ।

[यथार्थानुभवलक्षणम्]

**तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा 'अयं घटः' इति ज्ञानम् । सैव प्रमेत्युच्यते ।**

**यथार्थानुभवं लक्षयति-तद्वतीति । ननु 'घटे घटत्वम्' इति प्रमायाम् अव्याप्तिः, घटत्वे घटाऽभावाद् इति चेत् ? न, 'यत्र यत्सम्बन्धोऽस्ति तत्र तत्सम्बन्धानुभवः' इत्यर्थात् घटत्वेऽपि घट-सम्बन्धोऽस्ति इति नाऽव्याप्तिः । स एवेति यथार्थानुभव एव शास्त्रे 'प्रमा' इत्युच्यते इत्यर्थः ।**

**तद्वती**ति । तद्वतीति सप्तम्यन्तस्य तद्वद्विशेष्यकत्वरूपोऽर्थः । तद्वद्विशेष्यकत्वे सति, तत्प्रकारकत्वे सति, स्मृतिभिन्नत्वे सति ज्ञानत्वं 'यथार्थानुभवत्वं' । रजते 'इदं रजतम्' इत्याकारके यथार्थानुभवे वर्तते इदं लक्षणम् । अत्र रजतत्ववद्विशेष्यकत्वं रजतत्वप्रकारकानुभवत्वं च वर्तते । अत्र लक्षणे स्मृतावतिव्याप्तिवारणाय स्मृतिभिन्नेति । शुक्तौ 'इदं रजतम्' इत्याकारके अयथार्थानुभवेऽतिव्याप्तिवारणाय तद्वद्विशेष्यकेति, अत्र रजतत्ववद्विशेष्यकत्वं नास्ति, 'इदं रजतं शुक्तिस्वरूपं दृश्यते' इत्यत्रातिव्याप्तिः, तद्वारणाय तत्प्रकारकेति । अत्र यद्यपि रजतत्ववद्विशेष्यकत्वं वर्तते तथापि तत्प्रकारकत्वं नास्ति, किन्तु शक्तित्वप्रकारकत्वं भासते । अथ 'इदं रजतं मे भवतु' इति इच्छायामतिव्याप्तिः, तद्वारणाय ज्ञानत्वमिति । यद्यप्यत्र इदंत्वावच्छिन्न-विशेष्यकरजतत्वप्रकारकत्वमस्ति परं ज्ञानत्वं नास्ति । **ननु घटे घटत्व**मिति-अत्र घटत्वं विशेष्यं घटो विशेषणम् । ***इह*** घटप्रकारकत्वे सति, स्मृतिभिन्नत्वे सति ज्ञानत्वं तु अस्ति, परं घटवद्विशेष्यकत्वं नास्ति, कुतः ? घटत्वे घटाभावात्, एतेनाव्याप्तिः । ***मैवम्,*** यथार्थानुभवस्यायमर्थो विवक्षितः 'यत्र धर्मिणि यस्य धर्मस्य सम्बन्धोऽस्ति तत्र तत्सम्बन्धस्य अनुभवो यथार्थानुभव उच्यते इति



सम्बन्धस्य उभयनिष्ठत्वं, तेन यद्यपि घटत्वे घटो नास्ति तथापि घटसम्बन्धोऽस्त्येव, स चात्र आधेयताख्यः । **स एवे**ति-सैवेति पाठान्तरं, विधेयप्राधान्यात् स्त्रीलिङ्गनिर्देशो बोध्यः ।

[अयथार्थानुभवलक्षणम्]

**तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः ।**

**अयथार्थानुभवं निरूपयति-तदभाववतीति । ननु 'इदं संयोगि' इति प्रमायाम् अतिव्याप्तिः इति चेत् ? न, यदवच्छेदेन यत्सम्बन्धाभावः तदवच्छेदेन तत्सम्बन्धज्ञानस्य विवक्षिततत्वात् । संयोगाभावावच्छेदेन संयोगज्ञानस्य भ्रमत्वात् संयोगावच्छेदेन संयोग-सम्बन्धस्य सत्त्वात् नातिव्याप्तिः ।**

अयथार्थं लक्षयति-तदभाववद्विशेष्यकत्वे सति इति । ईयान् विशेषः शेषं पूर्ववत् । 'इदं रजतम्' इत्यत्रातिव्याप्तिवारणाय आद्यं पदम् । शुक्तौ 'इदं शुक्तिः' इत्यत्रातिव्याप्तिवारणाय द्वितीयम् । अत्र यद्यपि रजतत्वाभाव-वद्विशेष्यकत्वं वर्तते तथापि रजतत्वप्रकारकत्वं नास्ति । शुक्तौ 'इदं रजतम्' इति स्मृतावतिव्याप्तिवारणाय स्मृतिभिन्नेति । केनचित् शुक्तिरेव रजतत्वेनावगता, तत 'इदं मे भवतु' इति इच्छा जाता, तत्रातिव्याप्तिवारणाय ज्ञानत्वम् । **ननु इदं संयोगी**ति-'वृक्षः कपिसंयोगी' ***अत्र*** संयोगवद्विशेष्यकत्वे सति संयोगप्रकार-कानुभवत्वं वर्तते, अतः भवतीयं प्रमा, अत्र अप्रमालक्षणं गतम् । कुतः ? संयोगस्याव्याप्यवृत्तित्वात् । ***मैवम्,*** अयथार्थानुभवस्य अयमर्थो विवक्षितः **यदिति**-यन्मूलावच्छेदेन यत्कपिसम्बन्धाभावः, तन्मूलावच्छेदेन तन्मूलकपिसंयोग-सम्बन्धज्ञानं भ्रमज्ञानं भवति । तादृग् ज्ञानम् अत्र मूलावच्छेदेन वर्तते परं शाखावच्छेदेन नास्ति, तेन नातिव्याप्तिः ।

[यथार्थानुभवविभागः]

**यथार्थानुभवश्चतुर्विधः प्रत्यक्षाऽनुमित्युपमितिशाब्द-भेदात् ।**

**यथार्थानुभवं विभजते-यथार्थेति ।**

[प्रमाणविभागः]

## तत्करणमपि चतुर्विधम् । प्रत्यक्षानुमानोपमानशब्दभेदात् ।

**प्रसङ्गात् प्रमाकरणं विभजते-तत्करणमिति । प्रमाकरण-मित्यर्थः । प्रमायाः करणं प्रमाणमिति प्रमाणसामान्यलक्षणम् ।**

**तत्करणमपी**ति । प्रमाकरणं प्रमाणम् । अत्र च 'करणं प्रमाणम्' इत्युच्यते चेत् कुठारेऽतिव्याप्तिः, सोऽपि छेदं प्रति करणमस्ति, अतो 'मा' पदं वाच्यम् । 'मा' नाम ज्ञानं, तस्याः करणं प्रमाणम् । एवमपि काचकामलदोषदुष्टे चक्षुरिन्द्रियेऽतिव्याप्तिः, 'पीतः शङ्खः' इत्याकारकेऽयथार्थज्ञाने तदपि करणं भवति, अतोऽत्र 'प्र'पदं वाच्यमिति ।

[करणलक्षणम्]

## असाधारणं कारणं करणम् ।

**करणलक्षणमाह-असाधारणमिति । साधारणे दिक्कालादौ अतिव्याप्तिवारणाय असाधारणमिति ।**

[कारणलक्षणम्]

## कार्यनियतपूर्ववृत्ति कारणम् ।

**कारणलक्षणमाह-कार्येति । 'पूर्ववृत्ति कारणम्' इत्युक्ते रासभादौ अतिव्याप्तिः स्याद् अतो नियतेति । तावन्मात्रे कृते कार्ये अतिव्याप्तिः, अतः पूर्ववृत्तीति । ननु तन्तुरूपम् अपि पटं प्रति कारणं स्याद् इति चेत् ? न, 'अनन्यथासिद्धत्वे सति' इति विशेषणात् । अनन्यथासिद्धत्वम् अन्यथासिद्धिविरहः ।**

**अन्यथासिद्धिः त्रिविधा । तथाहि ( १ ) येन सहैव यस्य यं**



**प्रति पूर्ववृत्तित्वम् अवगम्यते तं प्रति तेन तद् अन्यथासिद्धम्, यथा तन्तुना तन्तुरूपं तन्तुत्वं च पटं प्रति । ( २ ) अन्यं प्रति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्तित्वम् अवगम्यते तं प्रति तद् अन्यथासिद्धम्, यथा शब्दं प्रति पूर्ववृत्तित्वे ज्ञाते पटं प्रति आकाशस्य । ( ३ ) अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतम् अन्यथासिद्धम्, यथा पाकजस्थले गन्धं प्रति रूपप्रागभावस्य । एवं च अनन्यथा-सिद्धनियतपूर्ववृत्तित्वं कारणत्वम् ।**

**कार्ये**ति-कार्यनियतपूर्ववृत्तित्वं कारणत्वम् । दैवादागते रासभेऽति-व्याप्तिवारणाय **नियते**ति । 'कार्यनियतत्वम् कारणत्वम्' इत्युक्ते कार्येऽति-व्याप्तिः, यथा घटे घटनित्यत्वं वर्तते, अतः पूर्ववृत्तीति । ननु तन्तुरूपस्यापि पटं प्रति नियतपूर्ववृत्तित्वं वर्तते तत्रातिव्याप्तिः इति चेत् ? न, **अनन्यथे**ति । रूपस्य पटं प्रति स्वाश्रयतन्तुव्यतिरेकेण पूर्ववृत्तित्वं नास्ति, तन्तून् आदायैव पूर्ववृत्तित्वं वर्तते, अतो रूपमन्यथासिद्धम् । **तथाहि येन सहैवेति । अन्यं प्रतीति** । शब्दं प्रति आकाशस्य पूर्ववृत्तित्वं गृहीत्वैव घटं प्रति गृह्यते । तत्र तावदाकाशत्वग्रहोऽपेक्षितः, कुतः ? पटं प्रति आकाशस्य आकाशत्वरूपेण पूर्ववृत्तित्वग्रहो भवति । 'तत्र एकव्यक्तिमात्रवृत्तिस्तु न जातिः' इति आकाशत्वं जातिस्तु न, किन्तु शब्दसमवायिकारणत्वम् आकाशत्वम्-शब्दनिरूपितान्यथा-सिद्धिशून्यत्वे सति शब्दाव्यवहितपूर्ववृत्तित्वम् । एवं च पटं प्रति आकाश-स्यान्यथासिद्धत्वम् । **अन्यत्रे**ति-अपाकजस्थले गन्धप्रागभावादेव गन्धसम्भवः स्यात् । ततः पाकजस्थले गन्धप्रागभावस्य सहभूता ये रूपरसस्पर्शप्रागभावाः तेषामन्यथासिद्धत्वं गन्धं प्रति । एवं रसादौ अपि । कार्यमात्रं प्रति प्रागभावत्वेन कारणता । ***ननु*** प्रागभावस्य कारणता किमर्थं स्वीकृता ? ***उच्यते,*** उत्पन्नस्य पुनरुत्पादापतिवारणाय प्रागभावस्य कारणत्वम् । यथा घटोत्पत्तेरनन्तरं दण्डादिसकलसामग्रीसत्त्वेऽपि पुनरपि तदुत्पत्तिर्न, प्रागभावरूपस्य कारणस्य विनष्टत्वात् ।

[कार्यलक्षणम्]

## कार्यं प्रागभावप्रतियोगि ।

**कार्यलक्षणमाह-कार्यमिति ।**

**कार्य**मिति प्रागभावप्रतियोगित्वम् । उत्पत्तिमत्सु सर्वेषु प्रागभाव-प्रतियोगित्वं वर्तते, यथा घटप्रागभावप्रतियोगित्वं घटे ।

[कारणविभागः]

**कारणं त्रिविधम् । समवाय्यसमवायिनिमित्तभेदात् ।**

[समवायिकारणलक्षणम्]

**यत्समवेतं कार्यमुत्पद्यते तत् समवायिकारणम् । यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः ।**

[असमवायिकारणलक्षणम्]

**कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायि कारणम् । यथा तन्तुसंयोगः पटस्य । तन्तुरूपं पटरूपस्य ।**

**कारणं विभजते-कारणमिति । समवायिकारणलक्षणमाह-यत्समवेतमिति । यस्मिन् समवेतम् इत्यर्थः । असमवायि-कारणलक्षणमाह-कार्येणेति । कार्येणेत्येतद् उदाहरति-तन्तुसंयोग इति । कार्येण पटेन सह एकस्मिन् तन्तौ समवेतत्वात् तन्तुसंयोगः पटस्य असमवायिकारणम् इत्यर्थः । कारणेन सहेत्येतद् उदाहरति-तन्तुरूपमिति । कारणेन पटेन सह एकस्मिन् तन्तौ समवेतत्वात् तन्तुरूपं पटरूपस्य असमवायिकारणम् इत्यर्थः । निमित्तकारणं लक्षयति-तदुभयेति । समवायि-असमवायि-भिन्नकारणं निमित्त-कारणम् इत्यर्थः ।**

**तन्तुसंयोग** इति-तन्तौ पटस्य तन्तुसंयोगस्य च समवेतत्वे सति कारणं तन्तुसंयोगः । स एव पटस्यासमवायिकारणम् । अत्र कारणपदं तन्तुत्वेऽति-



व्याप्तिवारणाय ।

[निमित्तकारणलक्षणम्]

**तदुभयभिन्नं कारणं निमित्तकारणम् । यथा तुरीवे-मादिकं पटस्य ।**

**तदेतत् त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम् ।**

**करणलक्षणमुपसंहरति-तदेतद् इति ।**

[प्रत्यलक्षणम्]

**तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्नि-कर्षज्ञानं प्रत्यक्षम् । ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् ।**

**प्रत्यक्षलक्षणमाह-तत्रेति । प्रमाणचतुष्टयमध्ये इत्यर्थः । प्रत्यक्षज्ञानस्य लक्षणमाह-इन्द्रियेति । इन्द्रियं चक्षुरादिकम्, अर्थो घटादिः तयोः सन्निकर्षः संयोगादिः, तज्जन्यं ज्ञानमित्यर्थः ।**

**तत्रे**ति प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । दण्डादौ अतिव्याप्तिवारणाय **ज्ञाने**ति । अनुमानादौ अतिव्याप्तिवारणाय **प्रत्येति । इन्द्रिये**ति । इन्द्रियार्थ-सन्निकर्षजन्यत्वे सति ज्ञानत्वं प्रत्यक्षत्वम् । इन्द्रियार्थध्वंसेऽतिव्याप्तिवारणाय **ज्ञान**पदम् । अनुमित्यादौ अतिव्याप्तिवारणाय **इन्द्रियार्थसन्निकर्षजन्य**मिति ।

[प्रत्यक्षविभागः]

**तद् द्विविधं निर्विकल्पकं सविकल्पकं चेति । तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम् । सप्रकारकं ज्ञानं सविकल्पकम्, यथा ''डित्थोऽयम्'' ''ब्राह्मणोऽयम्'' ''श्यामोऽयम्'' इति ।**

**तद् विभजते-तद् द्विविधमिति । निर्विकल्पकस्य लक्षणमाह-निष्प्रकारकमिति । विशेषणविशेष्यसम्बन्धानवगाहिज्ञानमित्यर्थः । ननु निर्विकल्पके किं प्रमाणम् इति चेत् ? न, 'गौः' इति विशिष्टज्ञानं, विशेषणज्ञानजन्यं-विशिष्टज्ञानत्वात्-'दण्डी' इति ज्ञानवत् इत्यनुमानस्य प्रमाणत्वात् । विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्था-प्रसङ्गात् निर्विकल्पकत्वसिद्धिः । सविकल्पकं लक्षयति-सप्रकारकमिति । नामजात्यादिविशेषणविशेष्यसम्बन्धावगाहिज्ञानम् इत्यर्थः । सविकल्पकमुदाहरति-यथेति ।**

**तद् द्विविध**मिति । प्रकारताख्यविषयताशालित्वे सति ज्ञानत्वं सविकल्पकत्वम् । प्रकारताख्यविषयताशून्यत्वे सति ज्ञानत्वं निर्विकल्पकत्वम् । घटघटत्वे इत्यभिलापके शब्दे निर्विकल्पकज्ञानं तदतीन्द्रियं भवति, यतः प्राथमिकगोत्वविशिष्टज्ञानात् पूर्वं यद् गोत्वज्ञानं तद्विशेष्यविशेषणसम्बन्धानवगाह्येव भवतीत्यर्थः ।

**नन्वि**ति । गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यत्वव्याप्यं, यथा दण्डी पुरुष इत्याकारकं दण्डविशिष्टज्ञानम् । तत् कदा भवति ? यदा पूर्वं दण्डो जायते तदा स्यात् । तथाऽत्रापि 'अयं गौः' इत्याकारकं गोत्वविशिष्टज्ञानं गोत्वविशेषणज्ञानजन्यं तद् गोत्वज्ञानं निर्विकल्पकं बोध्यम् ।

**नामजात्या**दिति । यथाऽयं चैत्रः, अत्र नाम्नो विशेषणत्वं, व्यक्तेर्विशेष्यत्वम् । यथाऽयं ब्राह्मणः, अत्र ब्राह्मणत्वजातेर्विशेषणत्वं, व्यक्तेर्विशेष्यत्वम् ।

[इन्द्रियार्थसन्निकर्षविभागः]

**प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः समवेतसमवायः, विशेषणविशेष्यभावश्चेति ।**

**इन्द्रियार्थसन्निकर्षं विभजते-प्रत्यक्षेति ।**



[संयोगसन्निकर्षनिरूपणम्]

**चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।**

**संयोगसन्निकर्षम् उदाहरति-चक्षुषेति । द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्षः इत्यर्थः । आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियम् अर्थेन । ततः प्रत्यक्षज्ञानम् उत्पद्यते ।**

[संयुक्तसमवायसन्निकर्षनिरूपणम्]

**घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।**

**संयुक्तसमवायमुदाहरति-घटरूपेति । तत्र युक्तिमाह-चक्षुः-संयुक्त इति ।**

[संयुक्तसमवेतसमवायसन्निकर्षनिरूपणम्]

**रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः । चक्षुःसंयुक्ते घटे रूपं समवेतं तत्र रूपस्य समवायात् ।**

**संयुक्तसमवेतसमवायम् उदाहरति-रूपत्वेति ।**

[समवायसन्निकर्षनिरूपणम्]

**श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः । कर्णविवरवर्त्याकाशस्य श्रोत्रत्वात्, शब्दस्याकाशगुणत्वात्, गुणगुणिनोश्च समवायात् ।**

**समवायम् उदाहरति-श्रोत्रेणेति । तदुपपादयति-कर्णेति । ननु दूरस्थशब्दस्य कथं श्रोत्रेण सम्बन्ध इति चेत् ? न, वीचीतरङ्गन्यायेन कदम्बमुकुलन्यायेन वा शब्दाच्छब्दान्तरोत्पत्तिक्रमेण श्रोत्रदेशे जातस्य**

**श्रोत्रसम्बन्धात् प्रत्यक्षत्वसम्भवात् ।**

**कदम्ब**ति-यथा कदम्बमुकुलं युगपदेव दशदिक्षु विकसति तथा शब्दोत्पत्तिकाले समकालमेव आद्यशब्दाद् दशशब्दा उत्पद्यन्ते । तैश्चान्ये दशशब्दा उत्पाद्यन्ते इत्यादि ।

[समवेतसमवायसन्निकर्षनिरूपणम्]

**शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः । श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।**

**समवेतसमवायमुदाहरति-शब्दत्वेति ।**

[विशेषणविशेष्यभावसन्निकर्षनिरूपणम्]

**अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः । घटाभाववद् भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।**

**एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम् । तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणं सिद्धम् ।**

**विशेषणविशेष्यभावमुदाहरति-अभावेति । तदुपपादयति-घटाभाववद् इति । भूतलं विशेष्यम् । घटाभावो विशेषणम् । 'भूतले घटो नास्ति' इत्यत्र घटाऽभावस्य विशेष्यत्वं द्रष्टव्यम् । एतेन अनुपलब्धेः प्रमाणान्तरत्वं निरस्तम् । 'यद्यत्र घटोऽभविष्यत् तदा भूतलमिवाद्रक्ष्यत्, दर्शनाभावान्नास्ति' इति तर्कितप्रतियोगिसत्त्व-विरोध्यनुपलब्धेः सहकृतेन इन्द्रियेणैव अभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणाऽन्तरत्वासम्भवात् । अधिकरणज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तौ अनुपलब्धेः करणत्वस्य अयुक्तत्वात्, विशेषण-विशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः सम्बन्धः ।**



**प्रत्यक्षज्ञानमुपसंहरन् तस्य कारणमाह-एवमिति । असाधारण-कारणत्वाद् इन्द्रियं प्रत्यक्षज्ञानकरणम् इत्यर्थः । प्रत्यक्षम् उपसंहरति-तस्माद् इति ।**

मीमांसकैः सन्निकर्षपञ्चकं स्वीक्रियते, अभावज्ञानार्थम् अनुपलब्धिः प्रमाणान्तरं च मन्यते । तत्रोच्यते-प्रमाणान्तरं माऽस्तु, 'यदि अत्र घटोऽभविष्यत् तदा भूतलमिवाद्रक्ष्यत्' इति तर्कितं यत् प्रतियोगिसत्त्वं तद्विरोधिनी याऽनुप-लब्धिः तया सहकृतं=विशिष्टं यदिन्द्रियं=चक्षुरिन्द्रियं तेनैव अभावज्ञानोपपत्तिः सिद्धा तदर्थमनुपलब्धेः प्रमाणान्तररत्वं व्यर्थम् । पुनश्च अधिकरणं भूतलम्, तद्ज्ञानार्थम् अपेक्षणीयं यदिन्द्रियं तस्यैव अभावज्ञाने करणत्वोपपत्तौ अनुपलब्धेः करणत्वम् अयुक्तम् । ***ननु*** मीमांसकमते लाघवं वर्तते प्रकृते तु गौरवम्, कुतः ? तेषां मते सन्निकर्षपञ्चकं, प्रकृते तु षट्कम् । पुनश्चात्रापि अनुपलब्धि-रूपः पदार्थः स्वीक्रियते । तथा इन्द्रियेण अभावप्रत्यक्षे जननीये अनुपलब्धेः सहकारित्वं वर्तते इति, ***अत्रोच्यते***-षष्ठः सन्निकर्षो विशेषणविशेष्यभावः, सोऽतिरिक्तः सम्बन्धो नास्ति किन्तु तत्स्वरूपमेव । विशेषणे विशेषणता विशेषणतास्वरूपमेव, विशेष्यता विशेष्यस्वरूपमित्यर्थः ।

॥ इति प्रत्यक्षपरिच्छेदः ॥

[अथानुमानपरिच्छेदः]

[अनुमानलक्षणम्]

**अनुमितिकरणम् अनुमानम् ।**

**अनुमानं लक्षयति-अनुमितिकरणमिति ।**

**अनुमिती**ति करणमनुमानमित्युक्ते कुठारेऽतिव्याप्तिः स्यात्, तदर्थं **मिति**पदं वाच्यम् । प्रत्यक्षेऽतिव्याप्तिवारणाय **'अनु'** पदम् ।

[अनुमितिलक्षणम्]

**परामर्शजन्यं ज्ञानम् अनुमितिः ।**

**अनुमितेर्लक्षणमाह-परामर्शेति । ननु संशयोत्तरप्रत्यक्षे अतिव्याप्तिः । स्थाणुपुरुषसंशयानन्तरं 'पुरुषत्वव्याप्यकरादिमान् अयम्' इति परामर्शे सति 'पुरुष एव' इति प्रत्यक्षजननात् । न च तत्राऽनुमितिरेव इति वाच्यम्, 'पुरुषं साक्षात्करोमि' इत्यनुव्यवसायविरोधाद् इति चेत् ? न, पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात् । सिषाधयिषाविरहसहकृतसिद्ध्यभावः पक्षता । साध्यसिद्धिः अनुमितिप्रतिबन्धिका । सिद्धिसत्त्वेऽपि 'अनुमिनुयाम्' इति इच्छायाम् अनुमितिदर्शनात् सिषाधयिषा उत्तेजिका । ततश्च उत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणवत् सिषाधयिषाविरहसहकृतसिद्ध्यभावस्यापि अनुमितिकारणत्वम् ।**

**परामर्शे**ति । प्रत्यक्षादौ अतिव्याप्तिवारणाय **'परामर्शजन्यम्'** इति, परामर्शध्वंसे अतिव्याप्तिवारणाय **'ज्ञानम्'** इति ।

**नन्वि**ति । 'स्थाणुर्वा पुरुषो वा' इति संशयात्मकं चतुष्कोटिकं ज्ञानं तावद् भवति । स्थाणुत्वम् (१) स्थाणुत्वाभावः (२) पुरुषत्वम् (३) पुरुषत्वाभावः (४) इति । ततः संशयानन्तरम् एककोटिकं ज्ञानं स्यात् अत्र ['अयम्'] पदार्थः पक्षः, पुरुषत्वं साध्यते, करादिमत्त्वं हेतुरिति । **न चे**ति । अनुमितौ 'अहं पुरुषमनुमिनोमि' इत्याकारकोऽनुव्यवसायः, सोऽत्र नास्ति इत्यनेन नेयमनुमितिः । **पक्षते**ति । पक्षतासहकृतो यः परामर्शः तज्जन्यत्वे सति ज्ञानत्वम् इति लक्षणं विवक्षितं, तेन संशयोत्तरप्रत्यक्षे यद्यपि परामर्शजन्यत्वे सति ज्ञानत्वं वर्तते तथापि पक्षताविशिष्टपरामर्शजन्यत्वे सति ज्ञानत्वं नास्ति, अतो नातिव्याप्तिः ।

ननु पक्षता को वा पदार्थः ? इत्यत आह-**सिषाधयिषे**ति । अनुमितिविषयिणी इच्छा सिषाधयिषा, तद्विरहेण सहकृता या सिद्धिः, तदभावः पक्षता । अनुमितेः समानाकारकं ज्ञानं सिद्धिः । पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकसाध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकज्ञानं सिद्धिरित्यर्थः । सिद्धेः प्रतिबन्धिका सिषाधयिषा सा उत्तेजिका उच्यते । प्रतिबन्धकप्रतिबन्धकत्वम् उत्तेजकत्वम् ।



[परामर्शलक्षणम्]

## व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः । यथा ''वह्निव्याप्यधूमवान् अयं पर्वतः'' इति ज्ञानं परामर्शः । तज्जन्यं ''पर्वतो वह्निमान्'' इति ज्ञानम् अनुमितिः ।

**परामर्शं लक्षयति-व्याप्तीति । व्याप्तिविषयकं यत् पक्षधर्मताज्ञानं स परामर्श इत्यर्थः । परामर्शं दर्शयति-यथेति । अनुमितिम् अभिनीय दर्शयति-तज्जन्यमिति । परामर्शजन्यम् इत्यर्थः ।**

**व्याप्तिविशिष्टेति-शिरोमणिभट्टाचार्यै**र्ज्ञानान्तः कर्मधारयः स्वीकृतः । प्रकृतेऽपि तथैव । **उपाध्याय**मते धर्मान्तकर्मधारयाद् भावप्रत्ययः । **मिश्र**मते द्वन्द्वाद् भावप्रत्यय इति ।

[व्याप्तिलक्षणम्]

## यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः ।

**व्याप्तेर्लक्षणमाह-यत्रेति । 'यत्र धूमः तत्राग्निः' इति व्याप्तेरभिनयः । साहचर्यनियमः इति लक्षणम् । साहचर्यं सामानाधिकरण्यं, तस्य नियमः । हेतुसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिः इत्यर्थः ।**

व्याप्तेर्लक्षणमाह-नियतं साहचर्यं व्याप्तिः । अयं धूमवान् वह्नेरित्यादौ व्यभिचारिणि हेतौ नियतं साहचर्यं नास्ति तेन तत्र नातिव्याप्तिः । **हेत्वि**ति-व्याप्तिः सद्धेतुमात्रवृत्तिर्भवति । सद्धेतौ लक्षणमानेयं, कथम् ? हेतुर्धूमः, तत्सामानाधिकरणो योऽत्यन्ताभावः, वह्नेरत्यन्ताभावस्तु नायाति, तर्हि गोत्वात्यन्ताभावः, तत्प्रतियोगि गोत्वं, परं तदप्रतियोगि किं भवति ? साध्यं वह्निः, तत्सामानाधिकरण्यं वर्तते हेतौ धूमे इति । एवमपि असद्धेतौ नातिव्याप्तिः कथम् ? हेतुर्वह्निः, तत्समानाधिकरणो योऽत्यन्ताभावः धूमात्यन्ताभावोऽप्यायाति,

तप्तायःपिण्डे तथा दर्शनात्, तत्प्रतियोगि साध्यं धूमो वर्तते परं तदप्रतियोगि नास्ति इति कृत्वा नातिव्याप्तिः । ***ननु*** कस्मिंश्चित् सद्धेतौ अपि अव्याप्तिः ? यतोऽयं कपिसंयोगी एतद्वृक्षत्वाद् इत्यत्र इदंत्वरूपेण पक्षता, पक्षे च एतद्वृक्षत्वं वर्तते । ततः कपिसंयोगोऽप्यस्ति इति भवत्ययं सद्धेतुः । अथ हेतुरेतद्वृक्षत्वं तत्समानाधिकरणे योऽत्यन्ताभावः कपिसंयोगात्यन्ताभावोऽप्यायाति, अव्याप्यवृत्तित्वात्, तत्प्रतियोगिसाध्यं कपिसंयोगोऽस्ति, परं तदप्रतियोगि नास्ति, इति कृत्वाऽव्याप्तिः इति चेद् ? ***न,*** व्याप्यवृत्तित्वं प्रतियोगिव्यधिकरणत्वं वाऽभावे विशेषणं निवेश्यं, ततो नाऽव्याप्तिः । व्याप्यवृत्तित्वं नाम अनवच्छिन्न-वृत्तिकत्वम् । प्रतियोगिव्यधिकरणत्वं नाम प्रतियोग्यनधिकरणवृत्तित्वम् । अथ च कपिसंयोगात्यन्ताभावो यद्यपि हेतुसमानाधिकरणोऽस्ति ततोऽपि व्याप्यवृत्तिर्नास्ति, तेन गोत्वाद्यभावो बोध्यः, अतः परं नाव्याप्तिः । यद्वा कपिसंयोगाभावो यद्यपि हेतुसमानाधिकरणः तथापि प्रतियोग्यधिकरणावृत्तिर्नास्ति, प्रतियोगी कपिसंयोगः, तदधिकरणं वृक्षः, तत्र अवृत्तिर्नास्ति, तेन गोत्वाद्यभावो ग्राह्यः । अथ पुनरपि सद्धेतौ अव्याप्तिः, यथा इदं द्रव्यं, विशिष्टसत्त्वात् । विशिष्टसत्त्वं नाम गुणकर्मान्यत्वविशिष्टसत्ता । यत्र यत्र विशिष्टसत्त्वं तत्र तत्र द्रव्यत्वं वर्तते द्रव्ये, अत्रेदं लक्षणं नायाति, कथम् ? हेतुर्विशिष्टसत्त्वं, तदधिकरणं यथा द्रव्यं तथा गुणः कर्म च, शुद्धसत्ताविशिष्टसत्तयोरैक्यात्, तन्निष्ठो व्याप्यवृत्तिर्योऽभावः द्रव्यत्वात्यन्ताभावः, तत्प्रतियोगिसाध्यं नास्ति इति कृत्वाऽव्याप्तिः । तदव्याप्ति-वारणाय प्रकृतो हेतुशब्दो हेतुतावच्छेदकावच्छिन्नहेतुपरो बोध्यः । हेतुर्गुण-कर्मान्यत्वविशिष्टसत्ता, हेतुतागुणकर्मान्यत्वविशिष्टसत्तायां, हेतुतावच्छेदकं गुणकर्मान्यत्वविशिष्टसत्तात्वं, तदवच्छिन्नो हेतुर्गुणकर्मान्यत्वविशिष्टसत्ता, तदधिकरणं द्रव्यमेव न तु गुणकर्मणी, इति नाव्याप्तिः । तत इदं लक्षणं जातं-व्याप्यवृत्तिहेतुतावच्छेदकावच्छिन्नहेतुसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्य-सामानाधिकरण्यं व्याप्तिः ।

[पक्षधर्मताविभागः]

**व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता ।**

**पक्षधर्मतास्वरूपमाह-व्याप्यस्येति ।**



**व्याप्यस्येति** । व्याप्त्याश्रयो व्याप्यो धूमः तस्य ।

[अनुमानविभागः]

**अनुमानं द्विविधम्-स्वार्थं परार्थं च ।**

**अनुमानं विभजते-अनुमानमिति । तद्द्वैविध्यं दर्शयति-स्वार्थमिति ।**

[स्वार्थानुमाननिरूपणम्]

**(तत्र) स्वार्थं स्वानुमितिहेतुः । तथाहि-स्वयमेव भूयोदर्शनेन 'यत्र यत्र धूमस्तत्र तत्राग्निः' इति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः । तद्गते चाग्नौ सन्दिहानः पर्वते धूमं पश्यन् व्याप्तिं स्मरति-'यत्र यत्र धूमस्तत्र तत्राग्निः' इति । तदनन्तरं 'वह्निव्याप्यधूमवानयं पर्वतः' इति ज्ञानमुत्पद्यते । अयमेव 'लिङ्गपरामर्शः' इत्युच्यते । तस्मात् 'पर्वतो वह्निमान्' इति ज्ञान-मनुमितिरुत्पद्यते । तदेतत् स्वार्थानुमानम् ।**

**तत्रेति-उभयोर्मध्ये इत्यर्थः । स्वार्थानुमितिं लक्षयति- स्वय-मेवेति । भूयोदर्शनेनेति । ननु पार्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्शनेऽपि मण्यादौ व्यभिचारोपलब्धेर्भूयोदर्शनेन कथं व्याप्ति-ग्रहः इति चेत् ? न, व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्ति-ग्राहकत्वात् । व्यभिचारज्ञानं द्विविधम्-निश्चयः शङ्का च । तद्विरहः क्वचित् तर्कात् क्वचित् स्वतः सिद्ध एव । धूमाग्न्योर्व्याप्तिग्रहे कार्यकारणभावभङ्गप्रसङ्गलक्षणस्तर्को व्यभिचारशङ्कानिवर्तकः । ननु सकलवह्निधूमयोः असन्निकर्षात् कथं व्याप्तिग्रहः इति चेत् ? न, वह्नित्वरूपसामान्यप्रत्यासत्त्या सकलवह्निधूमज्ञानसम्भवात् । तस्मा-**

**दिति-लिङ्गपरामर्श इति ।**

**भूयोदर्शनेने**ति । भूयस्सु स्थानेषु दर्शनं भूयोदर्शनं, यद्वा भूयसां साध्यसाधनसहचाराणां दर्शनं भूयोदर्शनम् । **नन्वि**ति । ***'यत्र*** यत्र पार्थिवत्वं तत्र तत्र लोहलेख्यत्वम्' इति बहुतरसहचारदर्शने सत्यपि हारकादौ व्यभिचारः, तत्र पार्थिवत्वे सत्यपि लोहलेख्यत्वं नास्ति अतो भूयोदर्शनेन कथं व्याप्तिग्रहः, इति चेत् ? ***न,*** व्यभिचारज्ञानविरहविशिष्टं सहचारज्ञानं व्याप्तिग्राहकमिति विवक्षित-त्वात् । अत्र व्यभिचारज्ञानमात्राभावोऽपेक्षितः, तेन निश्चयात्मकं संशयात्मकं च द्विविधमपि यद् व्यभिचारज्ञानं तदभावो ग्राह्यः । तत्र धूमो वह्निव्यभिचारीति निश्चयः, धूमो वह्निव्यभिचारी वा नेति शङ्का । **तद्विरह** इति । यदि धूमो वह्निव्यभिचारी स्यात् तर्हि वह्निजन्यो न स्यात्, वह्निजन्यत्वाभाववान् स्यादित्यर्थः, इत्ययं तर्को व्यभिचारशङ्कानिवर्तकः । **नन्वि**ति-***ननु*** इन्द्रियाणां सन्निकृष्टार्थ-ग्राहकत्वं, ततश्च निखिलानां वह्नीननां निखिलानां च धूमानां सन्निकर्षाभावात् कथं व्याप्तिग्रहः, इति चेत्, ***न,*** **धूमत्वे**ति अलौकिकसन्निकर्षस्त्रिविधः-सामान्यलक्षणः (१) ज्ञानलक्षणः (२) योगजधर्मश्चेति (३) । अत्र-धूमत्व-वह्नित्वरूपः सामान्यलक्षणोऽलौकिकसन्निकर्षोऽस्ति, तेन कृत्वा सकलानां धूमानां वह्नीनां च ज्ञानस्य सम्भवात् ।

[परार्थानुमाननिरूपणम्]

**यत् तु स्वयं धूमादग्निमनुमाय परप्रतिपत्त्यर्थं पञ्चावयववाक्यं प्रयुज्यते तत् परार्थानुमानम् । यथा पर्वतो वह्निमान्-१ । धूमवत्त्वात्-२ । यो यो धूमवान् स स वह्निमान् यथा महानसम्-३ । तथा चायम्-४ । तस्मात् तथा-५ इति । अनेन प्रतिपादिताल्लिङ्गात् परोऽप्यग्निं प्रतिपद्यते ।**

**परार्थानुमानमाह-यत्त्विति । यच्छब्दस्य 'तत्परार्थानुमानम्' इति तच्छब्देन अन्वयः । पञ्चावयववाक्यमुदाहरति यथेति ।**



**यत्त्वि**ति-परप्रतिपत्त्यर्थं=परस्य विप्रतिपत्तिवारणार्थं, विप्रतिपत्तिः संशयः संशयजनकं वाक्यं वा ।

[अवयवविभागः]

**प्रतिज्ञा-हेतूदाहरणोपनय-निगमनानि पञ्चा-वयवाः । 'पर्वतो वह्निमान्' इति प्रतिज्ञा । 'धूमवत्त्वाद्' इति हेतुः । 'यो यो धूमवान् स स वह्निमान्' इत्युदा-हरणम् । 'तथा चायम्' इत्युपनयः । 'तस्मात् तथा' इति निगमनम् ।**

**अवयवस्वरूपमाह-प्रतिज्ञेति । उदाहृतवाक्येषु प्रतिज्ञादि-विभागमाह-पर्वतो वह्निमानिति । साध्यवत्तया पक्षवचनं प्रतिज्ञा । पञ्चम्यन्तं लिङ्गप्रतिपादकं वचनं हेतुः । व्याप्तिप्रतिपादकवचनम् उदाहरणम् । व्याप्तिविशिष्टलिङ्गप्रतिपादकं वचनम् उपनयः । हेतुसाध्यवत्तया पक्षप्रतिपादकं वचनं निगमनम् । पक्षज्ञानं प्रतिज्ञा-प्रयोजनम् । लिङ्गज्ञानं हेतुप्रयोजनम् । व्याप्तिज्ञानम् उदाहरण-प्रयोजनम् । पक्षधर्मज्ञानम् उपनयप्रयोजनम् । अबाधितत्वादिकं निगमनप्रयोजनम् ।**

**प्रतिज्ञे**ति-उचितानुपूर्विकप्रतिज्ञादिपञ्चकसमुदायत्वं न्यायत्वम् । व्युत्क्रमोक्तानां न्यायत्वं नास्ति, उचितानुपूर्विकपदोपादानात् । **साध्ये**ति । साध्यवत्त्वेन पक्षप्रतिपादकं वाक्यं प्रतिज्ञा । पञ्चम्यन्तत्वे सति लिङ्गप्रतिपादकत्वं हेतुवाक्यस्य लक्षणम् । पक्षधर्मताज्ञानजनकत्वं उपनयवाक्यत्वम् । अबाधितत्वम् असत्प्रतिपक्षत्वं च निगमनप्रयोजनम् ।

[अनुमितिकरणनिरूपणम्]

**स्वार्थानुमितिपरार्थनुमित्योर्लिङ्गपरामर्श एव कर-णम् । तस्माल्लिङ्गपरामर्शोऽनुमानम् ।**

**अनुमितिकरणमाह-स्वार्थेति । ननु व्याप्तिस्मृतिपक्षधर्मता-ज्ञानाभ्यामेव अनुमितिसम्भवे विशिष्टपरामर्शः किमर्थमङ्गीकर्तव्य इति चेत् ? न, 'वह्निव्याप्यधूमवान् अयम्' इति शाब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात् । लिङ्गं न करणम्, अतीतानागतादौ व्यभिचारात् । 'व्यापारवत् कारणं करणम्' इति मते परामर्शद्वारा व्याप्तिज्ञानं करणम् । तज्जन्यत्वे तज्जन्यजनको व्यापारः । अनुमानमुपसंहरति-तस्मादिति ।**

**स्वार्थे**ति-अत्र पूर्वं पक्षधर्मताज्ञानं, यथा धूमवानयम् । ततश्च व्याप्तिस्मृतिः-यथा वह्निव्याप्तोऽयं धूमः । ततः परामर्शः-यथा वह्निव्याप्य-धूमवानयं पर्वतः । तदनन्तरम् अनुमितिर्जायते । तत्र परामर्शं प्रति आद्यं ज्ञानद्वयं कारणम् । अनुमितिं प्रति परामर्शस्य कारणता इति स्वमतम् । अथ पूर्वपक्षेण मीमांसकमतं दर्शयति-**ननु व्याप्ती**त्यादि । पूर्वं पक्षधर्मताज्ञानं, ततो व्याप्तिस्मृतिः, ताभ्यामेवानुमितिरिति तन्मतम् । अत्रोच्यते 'वह्निव्याप्यवानयम्' इति निर्धर्मतावच्छेदकः शब्दजन्यः परामर्शोऽयम्, अत्र आद्यं ज्ञानद्वयं नास्ति, अनुमितिस्तु वर्तते, तर्हि तां प्रति परामर्शस्यैव कारणता भवतामपि स्वीकर्तव्या, अतो गौरवम् । अस्माकं तु लाघवेन सर्वत्र परामर्शस्यैव कारणत्वम् । **लिङ्गमि**ति । ज्ञायमानं लिङ्गं करणमिति प्राचां मतम् । लिङ्गज्ञानं करणमिति नव्याः । प्राचां मते दोषमाह-**अतीते**ति । 'वह्निमान् अतीतधूमात्' अत्रा-नुमितिर्वर्तते, लिङ्गं तु नष्टम्, अतो व्यभिचारः । नव्यमते तु न दोषः, लिङ्गे नष्टेऽपि लिङ्गज्ञानस्य सत्त्वात् । फलायोगव्यवच्छिन्नं कारणं करणमिति प्राचां मतम् । 'व्यापारवद्' इति नव्यमतम् । नव्यानां मते यो यो व्यापारः स स प्राचां मते करणम् । अत्र परामर्शद्वारा व्याप्तिज्ञानं करणम्, व्याप्तिज्ञानेन अनुमितौ जननीयायां परामर्शो व्यापारः । **तज्जन्यत्वे सती**ति-व्याप्तिज्ञानजन्यत्वे सति व्याप्तिज्ञानजन्या याऽनुमितिः, तज्जनकत्वं वर्तते परामर्शे इति कृत्वा परामर्शो व्यापारः । एवमिन्द्रियेण प्रत्यक्षे जननीये सन्निकर्षो व्यापारः । इन्द्रियजन्यत्वे सति इन्द्रियजन्यं यत् प्रत्यक्षं तज्जनकत्वं वर्तते सन्निकर्षे इति सन्निकर्षो व्यापारः । सादृश्यज्ञानेन उपमितौ जननीयायाम् अतिदेशवाक्यार्थस्मृतिर्व्यापारः । सादृश्यज्ञानजन्यत्वे सति सादृश्यज्ञानजन्या या उपमितिः तज्जनकत्वं वर्तते



अतिदेशवाक्यार्थस्मृतौ इति । पदज्ञानेन शाब्दबोधे जननीये पदजन्य पदार्थस्मृतिर्व्यापारः, पदज्ञानजन्यत्वे सति पदज्ञानजन्यो यः शाब्दबोधः तज्जनकत्वं वर्तते पदजन्यपदार्थस्मृतौ इति पदजन्यपदार्थस्मृतिर्व्यापारः । एवं दण्डेन घटे जननीये भ्रमिर्व्यापारः, दण्डजन्यत्वे सति दण्डजन्यो यो घटस्तज्जनकत्वं वर्तते भ्रम्याम् इति भ्रमिर्व्यापारः । एवं सर्वत्र योज्यम् । अथ कुलालादौ अतिव्याप्तिवारणाय **तज्जन्यत्वे सती**ति । दण्डगतरूपादौ अतिव्याप्तिवारणाय विशेष्यदलम् ।

अथ परामर्शे व्याप्तिज्ञानजन्यत्वं कया रीत्या तदुच्यते । विशिष्ट-बोधश्चतुर्धा-विशिष्टस्य वैशिष्ट्यम् (१) विशेष्ये विशेषणम्, तत्रापि च विशेषणान्तरम् (२) एकत्र द्वयम् (३) एकविशिष्टेऽपरवैशिष्ट्यम् (४) इति । अत्र विशिष्ट-वैशिष्ट्यबोधः-यथा विशिष्टवैशिष्ट्यवगाहिबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारतानिर्णयत्वेन कारणता-यथा रक्तदण्डवान् पुरुषः । अत्र यथा रक्तत्वविशिष्ट-दण्डवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति दण्डत्वावच्छिन्न-विशेष्यक-रक्तत्वप्रकारकनिर्णयत्वेन कारणता, तथा अत्र व्याप्तिविशिष्टधूम-वैशिष्ट्यवगाहिबुद्धित्वावच्छिन्नं प्रति धूमत्वावच्छिन्न-विशेष्यकव्याप्तिप्रकारक-निर्णयत्वेन कारणता इति ।

[लिङ्गं विभागः]

## लिङ्गं त्रिविधम् । अन्वयव्यतिरेकि, केवलान्वयि, केवलव्यतिरेकि चेति ।

**लिङ्गं विभजते-लिङ्गमिति ।**

[अन्वयव्यतिरेकिलक्षणम्]

## अन्वयेन व्यतिरेकेण च व्याप्तिमदन्वयव्यतिरेकि, यथा वह्नौ साध्ये धूमवत्त्वम् । यत्र धूमस्तत्राग्निः, यथा महानसमित्यन्वयव्याप्तिः । 'यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति,' यथा महाह्रद इति व्यतिरेकव्याप्तिः ।

**अन्वयव्यतिरेकि लक्षयति-अन्वयेनेति । हेतुसाध्ययोर्व्याप्तिः अन्वयव्याप्तिः । तदभावयोर्व्याप्तिः व्यतिरेकव्याप्तिः ।**

**हेतुसाध्ययोरि**ति-धूमो व्याप्यः, वह्निर्व्यापकः, वह्न्यभावो व्याप्यः, धूमाभावो व्यापकः, एते अन्वयव्यतिरेकव्याप्ती बोध्ये ।

[केवलान्वयिलक्षणम्]

**अन्वयमात्रव्याप्तिकं केवलान्वयि । यथा घटोऽभिधेयः प्रमेयत्वात् पटवत् । अत्र प्रमेयत्वाभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति, सर्वस्यापि प्रमेयत्वादभिधेयत्वाच्च ।**

**केवलान्वयिनो लक्षणमाह-अन्वयेति । केवलान्वयिसाध्यकं लिङ्गं केवलान्वयि । अत्यताभावाप्रतियोगित्वं केवलान्वयित्वम् । केवलान्वयि उदाहरति-'घटोऽभिधेयः-प्रमेयत्वाद्' इति । ईश्वर-प्रमाविषयत्वं सर्वपदाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः ।**

**केवले**ति-केवलान्वयि साध्यं यस्य तत् । ईश्वरस्य प्रमाविषयत्वं सर्वपदानाम् अभिधाविषयत्वं च सर्वत्रास्ति । अभिधा=शब्दशक्तिः ।

[केवलव्यतिरेकिलक्षणम्]

**व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि । यथा पृथिवी इतरेभ्यो भिद्यते गन्धवत्त्वात् । यद् इतरेभ्यो न भिद्यते न तद् गन्धवत्, यथा जलम् न चेयं तथा, तस्मान्न तथेति । अत्र यद् गन्धवत् तदितरभिन्नमित्यन्वयदृष्टान्तो नास्ति पृथिवीमात्रस्य पक्षत्वात् ।**

**केवलव्यतिरेकिणो लक्षणमाह-व्यतिरेकेति । केवलव्यतिरेकि उदाहरति-पृथिवीति । ननु 'इतरभेदः प्रसिद्धो न वा ? आद्ये यत्र प्रसिद्धस्तत्र हेतुसत्त्वे अन्वयित्वम्, असत्त्वे असाधारण्यम् । द्वितीये साध्यज्ञानाभावात् कथं तद्विशिष्टाऽनुमितिः ? विशेषणज्ञानाभावे विशिष्टज्ञानानुदयात् । प्रतियोगिज्ञानाभावाद् व्यतिरेकव्याप्तिज्ञानमपि न स्याद् इति चेत् ? न, जलादित्रयोदशान्योन्याभावानां त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्यते । त्रयोदशत्वावच्छिन्न-साध्यस्य एकाधिकरणवृत्तित्वाभावाद् न अन्वयित्वासाधारण्ये । प्रत्येकाधिकरणप्रसिद्धा साध्यविशिष्टानुमितिः । साध्याभावव्यापकीभूताभावप्रतियोगित्वम् इति । व्यतिरेकव्याप्तिनिरूपणं च यदितरेति ।**



केवलव्यतिरेकिण उदाहरणमाह-**पृथिवी**ति । अत्र पृथिवीं पक्षीकृत्य इतरभेदः साध्यते गन्धवत्त्वेन हेतुना । यत्र यत्र इतरभेदाभावः तत्र तत्र गन्धाभावः इति व्यतिरेकव्याप्तिः । उदाहरणं, यद् गन्धवत्त्वेन हेतुना इतरभेदाभाववत् तत् गन्धाभाववत्, यथा जलम् । अयमर्थः-यादृक् स्वाश्रयसंयोगसम्बन्धेन गन्धवत्त्वं जले तादृग् इतरेष्वपि वर्तते, अतो न इतरभिन्नत्वम् । इयं पृथिवी-तथा इतरभेदाभावव्यापकगन्धाभाववती न, तस्माद् इतरभेदवती एवेयम् । ननु अनुमितेः पूर्वम् इतरभेदः प्रसिद्धो वा नास्ति ? प्रसिद्धश्चेत् तर्हि यत्र आश्रयविशेषे प्रसिद्धः, तत्र गन्धवत्त्वे हेतौ सति अन्वयित्वं स्यात्, केवलं व्यतिरेकव्याप्तिरेव न स्यात् । हेतोरसत्त्वे तु हेतौ असाधारण्यदोषः स्यात् । सर्वसपक्षव्यावृत्तोऽसाधारणः । अथ अनुमितेः पूर्वम् इतरभेदोऽप्रसिद्धश्चेत् तदा साध्यम् इतरभेदः, तस्य तु ज्ञानमेव नास्ति तर्हि कथं साध्यविशिष्टानुमितिः ? **विशेषणेत्या**दि सुगमम् । अन्यच्च इतरभेदाभावस्य प्रतियोगी इतरभेदः, तस्य ज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपि न स्यात् । व्यतिरेकव्याप्तेर्लक्षणं साध्याभावः इतरभेदाभावः, तस्य व्यापकीभूतो योऽभावः गन्धाभावः, तस्य प्रतियोगित्वं गन्धे इति । अत्रोच्यते **जलादी**ति-जलाष्टकं गुणकर्मसामान्यविशेषसमवायपञ्चकं च एते त्रयोदश, तत्र त्रयोदशान्योन्याभावः एकत्र नायाति, किन्तु एकत्र द्वादश द्वादश एवं त्रयोदशसु त्रयोदशापि । अथ पृथिव्यां तेषां मेलनं साध्यते । शेषं सुगमम् ।

[पक्षसपक्षविपक्षलक्षणम्]

**सन्दिग्धसाध्यवान् पक्षः । यथा धूमवत्त्वे हेतौ**

**पर्वतः । निश्चितसाध्यवान् सपक्षः । यथा तत्रैव महानसम् । निश्चितसाध्याभाववान् विपक्षः । यथा तत्रैव महाह्रदः ।**

**पक्षलक्षणमाह-सन्दिग्धेति । ननु श्रवणानन्तरभाविमननस्थले अव्याप्तिः, तत्र वेदवाक्यैः आत्मनो निश्चितत्वेन सन्देहाभावात् । किञ्च प्रत्यक्षेऽपि वह्नौ यत्र इच्छया अनुमितिः तत्र अव्याप्तिः, इति चेत् ? न, उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात् । सपक्षलक्षणमाह-निश्चितेति । विपक्षलक्षणमाह-निश्चितेति ।**

**सन्दिग्धे**ति-'आत्मा श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति प्रथमं वेदवाक्यैः श्रवणं, ततो मननं=युक्तिभिः परिचिन्तनं, ततो निदिध्यासनं= श्रुतस्यार्थस्य नैरन्तर्येण दीर्घकालमनुसन्धानम्, तत आत्मसाक्षात्कारः । तत्र श्रवणानन्तरं भावि यन् मननं, तद् अनुमितिरूपं वर्तते, तत्राऽव्याप्तिः, कुतः ? वेदवाक्ये निश्चितत्वेन साध्यस्यात्मनः सन्दिग्धत्वाभावात् । पुनः प्रत्यक्षेऽपि वह्नावित्यत्रापि । अत्र उत्तरम् **उक्ते**ति-साध्यसन्देहः पक्षता इति **प्राचां** मतम् । पक्षताविशिष्टः पक्षः । तन्मते तु उक्ताव्याप्तिस्तदवस्थैव अतः पक्षता-लक्षणं सिषाधयिषेत्यादि स्वीकृतं **नव्यैः** । अथ उक्तपक्षताश्रयत्वं पक्षलक्षणम् । एतेन यदि-सिषाधयिषा स्यात्तर्हि साध्यसन्देहाभावेऽपि अनुमितिः स्यादित्यर्थः, तेन उक्तस्थले नाव्याप्तिः ।

[हेत्वाभासविभागः]

**सव्यभिचार-विरुद्ध-सत्प्रतिपक्षाऽसिद्धाबाधिता पञ्च हेत्वाभासाः ।**

**एवं सद्धेतून् निरूप्य असद्धेतून् निरूपयितुं विभजते-सव्यभिचारेति । अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वं हेत्वाभासत्वम् ।**



असद्धेतून् आह **अनुमिती**ति-अनुमितिः तथा तस्या अनुमितेः कारणीभूतं यद् ज्ञानं व्याप्तिज्ञानादिकम् एतदन्यतरस्य प्रतिबन्धकीभूतं यत् यथार्थज्ञानं, तद्विषयत्वं हेत्वाभासत्वं वर्तते पञ्चसु इति हेत्वाभासत्वम् । अत्रानुमितिपदं नोच्यते, 'अनुमितिकारणप्रतिबन्धकयथार्थज्ञानविषयत्वम्' इत्येवोच्यते चेत् बाधसत्प्रतिपक्षयोः अव्याप्तिः तयोरनुमितिप्रतिबन्धकत्वात् । अथ **तत्कारणे**ति नोच्यते, 'अनुमितिप्रतिबन्धकयथार्थज्ञानविषयत्वम्' एवोच्यते चेत् सव्यभिचारादित्रयेऽव्याप्तिः, तेषां व्याप्तिज्ञानादिप्रतिबन्धकत्वात् । अथ यथार्थपदं नोच्यते चेत् पर्वतो वह्न्यभाववान् इति भ्रमदशायां सद्धेतोरपि बाधितत्वापत्तिः, अस्य भ्रमात्मकज्ञानस्याप्यनुमितिप्रतिबन्धकत्वात् । हेतोराभासाः दोषाः, यद्वा हेतव इव आभासन्ते इति हेत्वाभासाः दुष्टा हेतव इत्यर्थः ।

[सव्यभिचारलक्षणम्]

**सव्यभिचारोऽनैकान्तिकः । स त्रिविधः साधारणाऽसाधारणाऽनुपसंहारिभेदात् । तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकान्तिकः । यथा 'पर्वतो वह्निमान् प्रमेयत्वाद्' इति । प्रमेयत्वस्य वह्न्यभाववति ह्रदे विद्यमानत्वात् । सर्वसपक्षविपक्षव्यावृत्तः पक्षमात्रवृत्तिरसाधारणः । 'यथा शब्दो नित्यः शब्दत्वाद्' इति । शब्दत्वं हि सर्वेभ्यो नित्येभ्योऽनित्येभ्यश्च व्यावृत्तं शब्दमात्रवृत्ति । अन्वय-व्यतिरेकदृष्टान्तरहितोऽनुपसंहारी । यथा 'सर्वमनित्यं प्रमेयत्वाद्' इति । अत्र सर्वस्यापि पक्षत्वाद् दृष्टान्तो नास्ति ।**

**सव्यभिचारं विभजते-स त्रिविध इति । साधारणं लक्षयति-तत्रेति । उदाहरति-यथेति । असाधारणं लक्षयति-सर्वेति । अनुपसंहारिणो लक्षणमाह-अन्वयेति ।**

[विरुद्धलक्षणम्]

**साध्याभावव्याप्तो हेतुर्विरुद्धः । यथा 'शब्दो नित्यः कृतकत्वाद्' इति । कृतकत्वं हि नित्यत्वाऽभावेनाऽनित्यत्वेन व्याप्तम् ।**

विरुद्धं लक्षयति-साध्येति ।

[सत्प्रतिपक्षलक्षणम्]

**यस्य साध्याभावसाधकं हेत्वन्तरं विद्यते स सत्प्रतिपक्षः । यथा 'शब्दो नित्यः श्रावणत्वाच्छब्दवत्' । 'शब्दोऽनित्यः कार्यत्वाद् घटवद्' इति ।**

सत्प्रतिपक्षं लक्षयति-यस्येति ।

[असिद्धलक्षणम्]

**असिद्धस्त्रिविधः । आश्रयासिद्धः, स्वरूपासिद्धो, व्याप्यत्वासिद्धश्चेति । आश्रयासिद्धो यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजाऽरविन्दवत् इति । अत्र गगनारविन्दमाश्रयः, स च नास्त्येव । स्वरूपासिद्धो यथा शब्दोऽनित्यश्चाक्षुषत्वाद् रूपवदिति । अत्र चाक्षुषत्वं शब्दे नास्ति शब्दस्य श्रावणत्वात् । सोपाधिको हेतुर्व्याप्यत्वासिद्धः । साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः । साध्यसमानाधिकरणाऽत्यन्ताऽभावाऽप्रतियोगित्वं साध्यव्यापकत्वम् । साधनवन्निष्ठाऽत्यन्ताऽभावप्रतियोगित्वं साधनाऽव्यापकत्वम् । यथा 'पर्वतो**



**धूमवान् वह्निमत्त्वाद्' इत्यत्र आर्द्रेन्धनसंयोग उपाधिः । तथा हि 'यत्र धूमस्तत्राऽऽर्द्रेन्धनसंयोगः' इति साध्यव्यापकत्वम् । 'यत्र वह्निस्तत्राऽऽर्द्रेन्धनसंयोगो नास्ति' अयोगोलके आर्द्रेन्धनसंयोगाभावाद् इति साधनाऽव्यापकत्वम् । एवं साध्यव्यापकत्वे सति साधनाव्यापकत्वाद् आर्द्रेन्धनसंयोग उपाधिः । सोपाधिकत्वाद् वह्निमत्त्वं व्याप्यत्वाऽसिद्धम् ।**

असिद्धं विभजते-असिद्ध इति । आश्रयासिद्धमुदाहरति-गगनेति । स्वरूपासिद्धमुदाहरति-शब्द इति । व्याप्यत्वासिद्धस्य लक्षणमाह-सोपाधिक इति । उपाधेर्लक्षणमाह-साध्येति ।

उपाधिश्चतुर्विधः, केवलसाध्यव्यापकः, पक्षधर्मावच्छिन्नसाध्यव्यापकः, साधनावच्छिन्नसाध्यव्यापकः, उदासीनधर्मावच्छिन्नसाध्यव्यापकश्चेति । आद्यः आर्द्रेन्धनसंयोगः । द्वितीयो यथा 'वायुः-प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात्' इत्यत्र बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वव्यापकम् उद्भूतरूपवत्त्वम् । तृतीयो यथा-'प्रागभावो-विनाशी-जन्यत्वात्' इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम् । चतुर्थस्तु 'प्रागभावो विनाशी प्रमेयत्वात्' इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वम् ।

**शब्दो गुणश्चाक्षुषत्वा**दिति-चाक्षुषत्वं चक्षुरिन्द्रियजन्यप्रत्यक्षविषयत्वे, तत् शब्दे नास्ति ।

उपाधेर्लक्षणमाह-**साध्यव्यापकत्वे** इत्यादि । **साध्ये**ति-साध्यो धूमः, तत्समानाधिकरणो योऽत्यन्ताभाव आर्द्रेन्धनसंयोगाभावस्तु नायाति, तर्हि घटपटाद्यत्यन्ताभावः, तस्य प्रतियोगित्वं वर्तते घटादौ, अप्रतियोगित्वं वर्तते आर्द्रेन्धनसंयोगे । **साधने**ति-साधनं वह्निः, तद्वत् किम् ? अयोगोलकं, तन्निष्ठो योऽत्यन्ताभाव आर्द्रेन्धनसंयोगात्यन्ताभावः, तत्प्रतियोगित्वं वर्तते आर्द्रेन्धनसंयोगे

इति । उपाधिश्चतुर्विधः **केवले**त्यादि । पक्षधर्मसाधनोभयभिन्नत्वम् उदासीन-धर्मत्वम् । **द्वितीयो यथा वायु**रिति-प्रमेयत्वं घटादौ तत्र प्रत्यक्षत्वमप्यस्ति, प्रमेयत्वं वायौ तत्र न प्रत्यक्षत्वम् इत्ययमसद्धेतुः । पक्षधर्मः को वा ? बहिर्द्रव्यत्वम्, बहिर्द्रव्यत्वम्=आत्ममनोभिन्नद्रव्यत्वम् । यत्र बहिर्द्रव्यत्वे सति प्रत्यक्षत्वं तत्र उद्भूतरूपवत्त्वं वर्तते घटादौ इति साध्यव्यापकता पक्षे । साधनाव्यापकता यथा प्रमेयत्वं वर्तते वायौ, तत्र उद्भूतरूपं नास्ति । **तृतीयो यथा प्रागभावे**ति-यत्र यत्र जन्यत्वं तत्र तत्र अनित्यत्वं वर्तते घटादौ, जन्यत्वं ध्वंसे, तत्रानित्यत्वं नास्ति इत्ययमसद्धेतुः । साधनं किम् ? जन्यत्वम् । यत्र जन्यत्वे सति अनित्यत्वं तत्र भावत्वं वर्तते घटादौ इति साध्यव्यापकत्वम्, जन्यत्वं ध्वंसे तत्र भावत्वं नास्ति इति साधनाव्यापकत्वम् । चतुर्थो **यथा प्रागभावे**ति-यत्र यत्र प्रमेयत्वं तत्र तत्र विनाशित्वं वर्तते घटादौ, प्रमेयत्वं नित्यपदार्थेषु तत्र न विनाशित्वमित्ययमसद्धेतुः । अत्रोदासीनधर्मो जन्यत्वं, यत्र जन्यत्वे सति अनित्यत्वं तत्र भावत्वं वर्तते घटादौ इति साध्यव्यापकत्वम् । प्रमेयत्वं प्रागभावे, तत्र भावत्वं नास्तीति साधनाव्यापकता ।

[बाधितलक्षणम्]

**यस्य साध्याभावः प्रमाणान्तरेण पक्षे निश्चितः स बाधितः । यथा-'वह्निरनुष्णो द्रव्यत्वाद्' इति । अत्राऽनुष्णत्वं साध्यं, तदभाव उष्णत्वं स्पार्शनप्रत्यक्षेण गृह्यते इति बाधितत्वम् ।**

[व्याख्यातमनुमानम्]

**बाधितस्य लक्षणमाह-यस्येति । अत्र बाधस्य ग्राह्या-भावनिश्चयत्वेन, सत्प्रतिपक्षस्य विरोधिज्ञानसामग्रीत्वेन साक्षाद् अनुमितिप्रतिबन्धकत्वम् । इतरेषां परामर्शप्रतिबन्धकत्वम् । तत्रापि साधारणस्य अव्यभिचाराभाववत्तया, विरुद्धस्य सामानाधिकरण्या-भाववत्तया, व्याप्यत्वासिद्धस्य विशिष्टव्याप्त्यभाववत्तया, असाधा-रणानुपसंहारिणोर्व्याप्तिसंशयाधायकत्वेन व्याप्तिज्ञानप्रतिबन्धकत्वम् । आश्रयासिद्धस्वरूपासिद्धयोः पक्षधर्मताज्ञानप्रतिबन्धकत्वम् । उपाधिस्तु व्यभिचारज्ञानद्वारा व्याप्तिज्ञानप्रतिबन्धकः । सिद्धसाधनं तु पक्षताविघटकतया आश्रयासिद्धे अन्तर्भवतीति प्राञ्चः । निग्रह-स्थानान्तरमिति नवीनाः ।**



[इति दीपिकायामनुमानपरिच्छेदः]

**अत्र बाधस्ये**ति-ग्राह्यमनुष्णत्वं, तदभावः उष्णत्वं, तस्य निश्चयो बाधः, तेन बाधस्य 'वह्निरुष्णत्वाभाववान्' इत्यनुमितेः साक्षात्प्रतिबन्धकत्वम् । तद्वत्ताबुद्धित्वावच्छिन्नं प्रति तदभाववत्तानिर्णयत्वेन प्रतिबन्धकता । **सत्प्रति-पक्षस्ये**ति-अत्र परामर्शद्वयं, यथा-नित्यत्वव्याप्यश्रावणत्ववान् अयं शब्दः, अनित्यत्वव्याप्यकार्यत्ववान् अयं शब्दः । अत्रेयं विरोधिज्ञानसामग्री साक्षादनुमितिप्रतिबन्धिका । आद्या तु अनित्यत्वविरोधिनित्यत्वज्ञानसामग्री, द्वितीया तु नित्यत्वविरोध्यनित्यत्वज्ञानसामग्री । एवं च अनुमितिर्न जायते । **तत्रापी**ति-साधारणस्य अव्यभिचाराभावतया व्यभिचारित्वेन व्याप्तिज्ञान-प्रतिबन्धकत्वम् । अव्यभिचरितसाध्यसामानाधिकरण्यं व्याप्तिः । साधारणस्तु व्यभिचारी भवति । **विरुद्धस्ये**ति-विरुद्धस्य साध्यसामानाधिकरण्यं नास्ति, व्याप्तौ तु साध्यसामानाधिकरण्यमपेक्षितम् । **व्याप्यत्वासिद्धस्ये**ति-सोपाधि-कस्याव्यभिचरितसाध्यसामानाधिकरण्यं नास्ति तेन व्याप्तिज्ञानप्रतिबन्धकत्वम् । **आसाधारणे**ति-द्वयोरपि व्याप्तिसंशयजनकत्वं वर्तते तेन व्याप्तिज्ञान-प्रतिबन्धकत्वम् । पक्षातिरिक्तस्थले साध्यसाधनसहचारस्य साध्याभाव-साधनाभावसहचारस्य च ग्रहाभावात् व्याप्तिसंशयजनकत्वम् । **आश्रये**ति-'गगनारविन्दमरविन्दत्ववत्' इति पक्षधर्मताज्ञानं न भवत्येव आश्रयाभावात् । यथा 'शब्दश्चाक्षुषत्ववान्' इति पक्षधर्मताज्ञानमपि न स्यात्, शब्दे चाक्षुषत्वाभावात् । **उपाधिस्त्विति**-उपाधिव्यभिचारेण साध्यव्यभिचारोऽनुमीयते, यथा-वह्निः धूमव्यभिचारी धूमव्यापकार्द्रेन्धनसंयोगव्यभिचारित्वात् । एवं व्यापकव्यभिचारेण व्याप्यव्यभिचारित्वम् । ननु सिद्धिरप्यनुमितिप्रतिबन्धिका, तस्यां कुत्र अन्तर्भावः इत्याशङ्क्याह-**सिद्धे**ति-सिद्धसाधनं सिद्धिः, तत् पक्षताविघटकं भवति, तेनाश्रयासिद्धेऽत्यन्ताभावः इति प्राञ्चः । नव्यास्तु निग्रहस्थानान्तरमिदम् इत्याहुः । इत्यनुमानम् ।

[अथ उपमानपरिच्छेदः]

[उपमाननिरूपणम्]

**उपमितिकरणमुपमानम् । सञ्ज्ञासञ्ज्ञिसम्बन्धज्ञानमुपमितिः । तत्करणं सादृश्यज्ञानम् । अतिदेशवाक्यार्थस्मरणम् अवान्तरव्यापारः तथाहि-कश्चिद् गवयशब्दवाच्यपदार्थमजानन् कुतश्चिदारण्यकपुरुषाद् 'गोसदृशो गवयः' इति श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिण्डं पश्यति । तदनन्तरम् 'अयं गवयशब्दवाच्य' इत्युपमितिरुत्पद्यते ।**

[इत्युपमानम्]

**उपमानं लक्षयति-उपमितीति ।**

[इति दीपिकायामुपमानपरिच्छेदः]

[अथ शब्दपरिच्छेदः]

**आप्तवाक्यं शब्दः । आप्तस्तु यथार्थवक्ता । वाक्यं पदसमूहः, यथा-'गामानय शुक्लां दण्डेन' इति । शक्तं पदम् ।**

**शब्दं लक्षयति-आप्तेति । वाक्यं लक्षयति-वाक्यमिति । पदलक्षणमाह-शक्तमिति ।**

शब्दं लक्षयति-**आप्ते**ति । आप्तवाक्यं शब्दप्रमाणस्य लक्षणम् । अनाप्तोक्तेऽतिव्याप्तिवारणाय **आप्ते**ति ।

**शक्त**मिति-शक्तिमत्पदम्, शाब्दिकानां तु 'सुप्तिङन्तं पदम्' तेन घटमित्यत्र घटपदस्य घटत्वविशिष्टे शक्तिः, 'अम्' इति द्वितीयायाः कर्मत्वे



शक्तिः, एवं च पदद्वयम् । तेषां मते त्वेकमेव पदम् । पदं द्विविधम्-वाचकं पारिभाषिकं च । तत्र ईश्वरीयसङ्केतरूपा या शक्तिस्तयाऽर्थबोधकं यत् पदं तद् वाचकम् । आधुनिकसङ्केतरूपा या परिभाषा तयाऽर्थबाधकं यत् पदं तत् पारिभाषिकं गुणवृद्ध्यादि ।

[शब्दशक्तिलक्षणम्]

**अस्मात् पदादयमर्थो बोद्धव्य इति ईश्वरसङ्केतः शक्तिः ।**

**अर्थस्मृत्यनुकूलपदार्थसम्बन्धः शक्तिः । सा च पदार्थान्तरमिति मीमांसकाः, तन्निरासार्थमाह-अस्मादिति । डित्थादीनामिव घटादीनामपि सङ्केत एव शक्तिः, न तु पदार्थान्तरम् इत्यर्थः । गवादिशब्दानां जातावेव शक्तिः, विशेषणतया जातेः प्रथमम् उपस्थितत्वात्, व्यक्तिलाभस्त्वाक्षेपाद् इति केचित् तन्न, 'गामानय' इत्यादौ वृद्धव्यवहारेण सर्वत्र आनयनादेर्व्यक्तावेव शक्तिसम्भवेन जातिविशिष्टव्यक्तावेव शक्तिकल्पनात् । शक्तिग्रहश्च वृद्धव्यवहारेण । तथा हि, व्युत्पित्सुर्बालो 'गामानय' इत्युत्तमवृद्धवाक्यश्रवणानन्तरं मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं च दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यतिरेकाभ्यां वाक्यजन्यत्वं निश्चित्य 'अश्वमानय' 'गां बधान' इति वाक्यान्तरे आवापोद्वापाभ्यां गोपदस्य गोत्वविशिष्टे शक्तिः, अश्वपदस्य अश्वत्वविशिष्टे शक्तिः इति व्युत्पद्यते । ननु सर्वत्र कार्यपरत्वाद् व्यवहारस्य कार्यवाक्ये एव व्युत्पत्तिः न सिद्धे इति चेत् ? न, 'काञ्च्यां त्रिभुवनतिलको भूपतिः' इत्यादौ सिद्धेऽपि व्यवहारात् । 'विकसितपद्मे मधूनि पिबति मधुकरः' इत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेऽपि मधुकरादिव्युत्पत्तिदर्शनाच्च ।**

**लक्षणाऽपि शब्दवृत्तिः । शक्यसम्बन्धो लक्षणा । 'गङ्गायां**

**घोषः' इत्यत्र गङ्गापदवाच्यप्रवाहसम्बन्धादेव तीरोपस्थितौ तीरेऽपि शक्तिर्न कल्प्यते । सैन्धवादौ लवणाश्वयोः परस्परसम्बन्धाभावाद् नानाशक्तिकल्पनम् । लक्षणा त्रिविधा-जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति । यत्र वाच्यार्थस्यान्वयाभावः तत्र जहल्लक्षणा, यथा 'मञ्चाः क्रोशन्ति' । यत्र वाच्यार्थस्याप्यन्वयः तत्र अजहदिति, यथा 'छत्रिणो गच्छन्ति' । यत्र वाच्यैकदेशत्यागेन एकदेशान्वयः तत्र जहदजहदिति यथा 'तत्त्वमसी'ति । गौण्यपि लक्षणैव, लक्ष्यमाणगुणसम्बन्धस्वरूपा । यथा 'अग्निर्माणवक' इति ।**

**व्यञ्जनापि शक्तिलक्षणान्तर्भूता शब्दशक्तिमूला, अर्थशक्तिमूला च अनुमानादिना अन्यथासिद्धा । तात्पर्यानुपपत्तिः लक्षणाबीजम् । तत्प्रतीतीच्छया उच्चरितत्वरूपतात्पर्यज्ञानं च वाक्यार्थज्ञाने हेतुः, नानार्थानुरोधात् । प्रकरणादिकं तात्पर्यग्राहकम् ।**

**'द्वारम्' इत्यादौ 'पिधेहि' इति शब्दाध्याहारः । ननु अर्थज्ञानार्थत्वात् शब्दस्यार्थमविज्ञाय शब्दाध्याहारासम्भवाद् अर्थाध्याहार एव युक्त इति चेत् ? न, पदविशेषजन्यपदार्थोपस्थितेः शब्दज्ञाने हेतुत्वात् । अन्यथा 'घटः कर्मत्वम् आनयनं कृतिः' इत्यत्रापि शाब्दज्ञानप्रसङ्गात् ।**

**पङ्कजादिपदेषु योगरूढिः । अवयवशक्तिर्योगः । समुदायशक्तिः रूढिः । नियतपद्मत्वज्ञानार्थं समुदायशक्तिः, अन्यथा कुमुदेऽपि प्रयोगप्रसङ्गः । 'इतरान्विते शक्तिः' इति प्राभाकराः । अन्वयस्य वाक्यार्थतया भानसम्भवाद् अन्वयांशेऽपि शक्तिर्न कल्पनीया इति गौतमीयाः ।**

**अस्मा**दिति-सङ्केतः इच्छा । एतेन शक्तेर्गुणान्तर्भूतत्वान्न पदार्थान्तरत्वमिति भावः ।

**गवादीति**-गोपदस्य गोत्वे शक्तिः, न तु व्यक्तौ । व्यक्तीति-



आक्षेपोऽनुमानम् अर्थापत्तिर्वा । **केचिदि**दिति । **प्राभाकराः** । स्वमते तु गोत्वविशिष्टे शक्तिः, व्यक्तावित्यर्थः, न तु जातौ ।

**व्युत्पित्सुरिति**-उत्तमवृद्ध (१)-मध्यमवृद्ध (२)-बालेषु (३) स्थितेषु सत्सु उत्तमवृद्धेन 'गामानय' इति वाक्ये उक्ते सति मध्यमवृद्धस्य प्रवृत्तिर्जाता । तामुपलभ्य, गवानयनं च दृष्ट्वा व्युत्पत्तिमिच्छुर्बालो मध्मयवृद्धप्रवृत्तिजनकं ज्ञानं वाक्यजन्यं निश्चित्य, काभ्याम् ? **अन्वये**ति-वाक्यसत्त्वे ज्ञानसत्त्वं वाक्याभावे ज्ञानाभाव इति । **आवापेति**-आवापो गोबन्धनम्, उद्वापोऽश्वानयनं, ताभ्यां, शेषं सुगमम् । **नन्वि**ति-व्यवहारो वाक्यप्रयोगः, तस्य सर्वत्र कार्यपरत्वं कार्यप्रतीतीच्छया उच्चरितत्वं वर्तते, न तु सिद्धप्रतीतीच्छया । ततो व्यवहारस्य कार्यताबोधकपदघटितवाक्ये एव शक्तिः, न सिद्धबोधकपदघटितवाक्ये इति **मीमांसकैकदेशिनः** । तत्र सिद्धोऽपि व्यवहारो दृश्यते **यथा काञ्च्या**मिति-काञ्ची नगरी सिद्धा वर्तते, भूपतिरपि सिद्धोऽस्ति, अत्र वाक्ये कार्यताबोधकं पदमात्रं नास्तीत्यर्थः । पुनः केनचिद् बालेन 'मधुकर'पदार्थमजानता 'विकसिते पद्मे मधुकर' इति श्रुत्वा कदाचिद् विकसिते पद्मे भृङ्गो दृष्टः । ततश्च प्रसिद्धं यद्विकसितपद्मपदं, तत्साहचर्याद् 'अयं मधुकरपदवाच्य इति तस्य शक्तिग्रहो भवति । अत्रापि सिद्धे मधुकरे मधुकरपदशक्तिर्दृश्यते, तेन कार्यवाक्ये एव व्युत्पत्तिरिति नियमो नेत्यर्थः ।

**लक्षणे**ति । यथा शक्तिः शब्दस्य वृत्तिः तथा लक्षणापि शब्दस्य वृत्तिः । **शक्ये**ति-शक्यः पदार्थः, तत्सम्बन्धः । ननु यथा सैन्धवपदस्य लवणे अश्वे च शक्तिस्तथा गङ्गापदस्य प्रवाहे तीरे च शक्तिः कल्पनीया इत्यत आह **गङ्गायां गोष** इति । नन्वेवं सैन्धवादावपि लक्षणा कुतो न इत्याशङ्क्याह **सैन्धवादा**विति । **यत्रेति**-यथा मञ्चपदस्य वाच्योऽर्थो मञ्चः, तस्य क्रोशक्रियायाम् अन्वयः-सम्बन्धो नास्ति, ततो मञ्चस्थे पुरुषे लक्षणा इयं जहती । **यत्रे**ति-लक्ष्यस्य तु अन्वयः स्यादेव परं वाच्यस्याप्यन्वयो यत्र स्यात् तत्राजहती । **यथे**ति-छत्रिपदस्य छत्रिघटितसार्थे लक्षणा । इह गमनक्रियायां छत्रिणां तदितरेषां च अन्वयसम्भवाद् अजहतीयम् । **यत्रे**ति-तत्त्वमसी ति परमात्मजीवात्मनोः अभेदबोधकं वाक्यमिदम् । ***ननु*** अभेदस्तु नायाति परस्परार्थविरोधात्, यतः सर्वज्ञत्वविशिष्टचैतन्यं 'तत्'पदार्थः, किञ्चिज्ज्ञत्व-

विशिष्टचैतन्यं 'त्वं'पदार्थ इति । ***अत्रोच्यते*** इह 'जहदजहती' लक्षणा कार्या ततः 'तत्'पदवाच्यार्थस्य 'त्वं'-पदवाच्यार्थस्य च आद्यांशं त्यक्त्वा उत्तरांशान्वये सति 'चैतन्याभिन्नं चैतन्य'मिति बोधः स्यादिति भावः । **गौणी**ति-लक्षणा सा गौणीत्युच्यते । **अग्नि**रिति-'अग्नि'शब्दस्य अग्निसदृशे लक्षणा, माणवको ब्रह्मचारी । **व्यञ्जने**ति-व्यञ्जनाऽपि कैश्चिद् वृत्त्यन्तरं मन्यते, तन्न इत्यर्थः । **अर्थे**ति-अर्थे या पदस्य शक्तिः तन्मूलभूतापि कैश्चिद् वृत्त्यन्तरं मन्यते तदपि नेत्यर्थः । **अनुमानादिने**ति-इदं पदमेव शक्तम्-असति वृत्त्यन्तरे वृद्धैस्तत्र प्रयुज्यमानत्वादिति । आदिपदाद् वृद्धव्यवहारादिग्रहः । कुत्रचिदन्वयानुपपत्तिर्लक्षणाबीजं, कुत्रचित् तात्पर्यानुपपत्तिर्लक्षणाबीजम् । **तात्पर्ये**ति-वाक्यार्थज्ञानत्वावच्छिन्नं प्रति तात्पर्यज्ञानत्वेन कारणता, कुत इत्याह-**नाने**ति । नानार्थानुसरणात् तात्पर्यग्राहकं तु प्रस्तावादिकं, यथा भोजनसमये 'सैन्धवमानय' इत्युक्ते लवणमानीयते, गमनावसरे तु अश्व इति ।

ननु द्वारमित्युक्ते परस्य कथं शाब्दबोधः ? उच्यते, 'पिधेहि' 'उद्घाटय' इत्यादि शब्दाध्याहारेण द्वारकर्मकं पिधानमुद्घाटनं वेति शाब्दबोध इति भावः । **नन्वि**ति-***ननु*** शब्दाध्याहारस्तु अर्थज्ञानार्थं क्रियते अर्थज्ञानं विना शब्दाध्याहारो न सम्भवति अतः अर्थाध्याहार एव कार्यः, किं शब्दाध्याहारेण इति चेत् ? ***न,*** **पदे**ति-शाब्दज्ञानत्वावच्छिन्नं प्रति पदविशेषजन्यपदार्थोपस्थितित्वेन कारणता इति स्वीक्रियते, न तु अर्थोपस्थितिरेव कारणमिति भावः । अथ पदजन्येति वाच्यं, 'विशेष'पदं व्यर्थमित्याशङ्क्याह **अन्यथे**ति । यथा 'घटमानय' इत्यत्र 'घटकर्मक-आनयनानुकूला कृतिः' इति शाब्दबोधो भवति तथाऽत्रापि स्यादित्यर्थः, यतः उपस्थितिचतुष्टयमुभयत्रापि तुल्यं, परमेकत्र पदविशेषजन्यम्, एकत्र पदजन्यम्, तद् यथा-'घटमानय' इत्यत्र घटपदजन्या घटपदार्थोपस्थितिः (१), द्वितीया ['अम्' प्रत्यय]जन्या कर्मत्वोपस्थितिः (२), धातुजन्या आनयनरूपार्थोपस्थितिः (३), आख्यातजन्या वृत्त्युपस्थितिः (४) । 'घटः कर्मत्व'मित्यादौ आद्या तु प्राग्वत् (१), कर्मत्वपदजन्या कर्मत्वोपस्थितिः (२), ल्युडन्तपदजन्याऽऽनयनरूपार्थोपस्थितिः (३), कृतिपदजन्या कृत्युपस्थितिः (४) इति ।

पदं चतुर्विधम्-यौगिकं (१), रूढं (२), योगरूढं (३), यौगिकरूढं



चेति (४) । पङ्कजेति-पङ्कजनिकर्तरि सरोरुहेऽवयवशक्तिरस्ति, नियतं यत्पद्मत्वज्ञानं तदर्थं समुदायशक्तिरपि, अन्यथा पङ्कजनिकर्तृत्वं भेककुमुदादौ अप्यस्ति, तत्रापि 'पङ्कज'पदप्रयोगप्रसङ्गः स्यादिति भावः ।

**इतरे**ति-इतरेणान्वितः-इतरान्वितः, तत्र शक्तिर्यथा घटपदस्य घटान्वित-कर्मत्वे शक्तिः, 'अम्'पदस्य कर्मत्वान्वितानयने शक्तिः, धातोस्तावद् आनय-नान्वितकृतौ शक्तिरिति । प्रकृते तु घटपदस्य घटत्वविशिष्टे शक्तिः, द्वितीयायाः कर्मत्वे शक्तिः, धातोरानयने शक्तिः, आख्यातस्य कृतौ शक्तिः । एषां पदानामन्वयस्य वाक्यार्थमर्यादया भानं सम्भवत्येव, अतोऽन्वयांशे शक्तिकल्पन-मयुक्तमिति भावः ।

[वाक्यार्थज्ञानहेतुनिरूपणम्]

**आकाङ्क्षा योग्यता सन्निधिश्च वाक्यार्थज्ञाने हेतुः । पदस्य पदान्तरव्यतिरेकप्रयुक्तान्वयाऽननुभावकत्वम्-आकाङ्क्षा । अर्थाबाधो योग्यता । पदानामविलम्बेनो-च्चारणं सन्निधिः । तथा च आकाङ्क्षादिरहितं वाक्यम-प्रमाणम् । 'यथा गौरश्वः पुरुषो हस्ती' इति न प्रमाणम्, आकाङ्क्षाविरहात् । 'वह्निना सिञ्चेद्' इति न प्रमाणं, योग्यताविरहात् । प्रहरे प्रहरेऽसहोच्चारितानि 'गामानय' इत्यादि पदानि न प्रमाणम्, सान्निध्याभावात् ।**

**आकाङ्क्षेति । आकाङ्क्षादिज्ञानमित्यर्थः । अन्यथा आकाङ्क्षादिभ्रमाच्छाब्दभ्रमो न स्यात् । आकाङ्क्षां लक्षयति-पदस्येति । योग्यतालक्षणमाह-अर्थेति । सन्निधिलक्षणमाह पदाना-मिति । अविलम्बेन पदार्थोपस्थितिः सन्निधिः । उच्चारणं तु तदुपयोगितया उक्तम् । 'गौः अश्वः' इति । 'घटः कर्मत्वम्' इत्यपि अनाकाङ्क्षोदाहरणं द्रष्टव्यम् ।**

**आकाङ्क्षे**ति । शाब्दबोधत्वावच्छिन्नं प्रति आकाङ्क्षादिज्ञानत्वेन कारणता । **अन्यथे**ति-ज्ञानपदाभावे आकाङ्क्षादिभ्रमे सत्यपि शाब्दबोधो जायते स न स्यात् । **अविलम्बेने**ति-लक्षणं तु एतावदेव । उच्चारणं तु याऽविलम्बेन पदार्थोपस्थितिः तस्या उपयोगि भवति तदर्थमुक्तम् ।

[वाक्यविभागः]

**वाक्यं द्विविधं, वैदिकं लोकिकं च । वैदिकम् ईश्वरोक्तत्वात् सर्वमेव प्रमाणम् । लौकिकं तु आप्तोक्तं प्रमाणम्, अन्यदप्रमाणम् ।**

**वाक्यं विभजते-वाक्यमिति । वैदिके विशेषमाह-वैदिकमीश्वरोक्तत्वादिति । ननु वेदस्य अनादित्वात् कथम् ईश्वरोक्तत्वम् इति चेत् ? न, 'वेदः पौरुषेयः, वाक्यसमूहत्वात्, भारतादिवत्' इत्यनुमानेन पौरुषेयत्वसिद्धेः । न च स्मर्यमाणकर्तृकत्वम् उपाधिः, गौतमादिभिः शिष्यपरम्परया वेदेऽपि सकर्तृत्वस्मरणेन साधनव्यापकत्वात् । 'तस्मात् तपस्तेपानात् त्रयो वेदा अजायन्त' इति श्रुतेः । ननु वर्णा नित्याः 'स एवायं गकारः' इति प्रत्यभिज्ञाबलात्, तथा च कथं वेदस्यानित्यत्वम् इति चेत् ? न, 'उत्पन्नो गकारो नष्टो गकारः' इत्यादि प्रतीत्या वर्णानाम् अनित्यत्वात् 'सोऽयं गकार' इति प्रत्यभिज्ञायाः 'सेयं दीपज्वाला' इतिवत् साजात्यालम्बनत्वात् । वर्णानां नित्यत्वेऽपि आनुपूर्वीविशिष्टवाक्यस्यानित्यत्वाच्च । तस्माद् ईश्वरोक्तो वेदः । मन्वादिस्मृतीनाम् आचाराणां च वेदमूलकतया प्रामाण्यम् । स्मृतिमूलवाक्यानाम् इदानीमनध्ययनात् तन्मूलभूता काचिच्छाखा उच्छिन्ना इति कल्प्यते । ननु पाठ्यमानवेदवाक्योत्सादस्य कल्पयितुमशक्यतया विप्रकीर्णवादस्य अयुक्तत्वाद् इति नित्यानुमेयो वेदो मूलमिति चेत् ? न, तथापि वर्णानुपूर्वीज्ञानाभावेन बोधकत्वासम्भवात् ।**



**नन्वि**ति । **न चे**ति-यत्र यत्र पौरुषेयत्वं तत्र तत्र स्मर्यमाणकर्तृकत्वं यथा भारते इति साध्यव्यापकत्वम् । वाक्यसमूहत्वं वेदे तत्र स्मर्यमाणकर्तृकत्वं नास्ति इति साधनाव्यापकत्वम् । इत्याक्षेपः । **गौतमादिभि**रिति-वेदेऽपि कश्चन कर्ता तैः स्मर्यते इति साधनाव्यापकत्वं नास्तीति समाधानम् । **नन्वि**ति-योऽतीतकाले कुत्रचिद्देशे दृष्टः । **स एवायं गकार इति प्रत्यभिज्ञाबला**दिति-किञ्चिदंशे स्मरणात्मकं किञ्चिदंशेऽनुभवात्मकं यद् ज्ञानं सा प्रत्यभिज्ञा । प्रत्यभिज्ञा अभेदबोधिका भवति । अत्र दशांशे कालांशे च स्मरणं, गकारांशेऽनुभवः । **तथा चे**ति-वर्णानां नित्यत्वे कथं वेदस्यानित्यत्वम् ? यतः वर्णानां समूहः पदं, पदसमूहो वाक्यं, वाक्यसमूहो वेद इति चेत् ? न, **उत्पन्न इत्यादि** । एवं तर्हि प्रत्यभिज्ञाया का गतिस्तत्राह **सोऽय**मिति । प्रत्यभिज्ञायाः सजातीयविषयकत्वं वर्तते तेन 'सोऽयं गकार' इति यः पुरा दृष्टः तत्सजातीयः तत्सदृश इति यावत्, न तु स एवेत्यर्थः, यथा सेयं दीपज्वाला या पुरा दृष्टा तत्सदृशीत्यर्थः । **वर्णाना**मिति-आनुपूर्वी-पू(पो)र्वापर्यभावः । आनुपूर्वीविशिष्टानि यानि वाक्यानि तेषां समूहो वेदः तस्याप्यनित्यत्वमित्यर्थः । एतेन वेदस्य ईश्वरोक्तत्वात् प्रामाण्यम् । ननु स्मृत्यादीनां कथं प्रामाण्यम् ? तत्राह-**मन्वादी**ति-एषामपि मूलभूतः कश्चन वेदोऽस्तीत्यर्थः । ननु साम्प्रतं स वेदो कथं नोपलभ्यते ? इत्यत आह-**स्मृती**ति । ***ननु*** पठ्यमानवेदे स्मृतिमूलवेदवाक्यानां विच्छेदस्तु कल्पयितुं न शक्यते, पुनः स वेदोऽपि विप्रकीर्ण इति वादोऽपि न युक्तः तस्मात् स्मृतिमूलवेदः कदापि न साक्षात् किन्तु सदाऽनुमेय एव इति चेत् ? ***न,*** एवं सति आनुपूर्वीज्ञानं न स्यात् । तदभावे च वाक्यत्वस्य शाब्दबोधजनकत्वं न स्यात्, शाब्दबोधं प्रति आनुपूर्वीज्ञानत्वेन कारणता इति स्वीकारात् ।

[शब्दस्य करणत्वनिरूपणम्]

**वाक्यार्थज्ञानं शाब्दज्ञानं, तत्करणं शब्दः ।**

[इति शब्दप्रमाणम्]

**ननु ''एतानि पदानि-स्मारितार्थसंसर्गवन्ति-आकाङ्क्षादिमत्पदकदम्बकत्वात्-'गामानय दण्डेन' इति मद्वाक्यवत्'' इत्यनुमानादेव संसर्गज्ञानसम्भवात् शब्दो न प्रमाणान्तरमिति चेत् ? न,**

**अनुमित्यपेक्षया शाब्दज्ञानस्य विलक्षणत्वं 'शब्दात् प्रत्येमि' इत्यनुव्यवसायसाक्षिकस्य सर्वसम्मतत्वात् ।**

**ननु अर्थापत्तिरपि प्रमाणान्तरमस्ति 'पीनो देवदत्तो दिवा न भुङ्क्ते' इति दृष्टे, श्रुते वा, पीनत्वान्यथानुपपत्त्या रात्रिभोजनम् अर्थापत्त्या कल्प्यते इति चेत् ? देवदत्तो रात्रौ भुङ्क्ते दिवाऽभुञ्जानत्वे सति पीनत्वात् इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् ।**

**'शते पञ्चाशद्' इति सम्भवोऽपि अनुमानमेव ।**

**'इह वटे यक्षस्तिष्ठति' इति ऐतिह्यमपि अज्ञानमूलवक्तृकः शब्द एव ।**

**चेष्टा अपि शब्दानुमानद्वारा व्यवहारहेतुः इति न मानान्तरम् । तस्मात् प्रत्यक्षानुमानोपमानशब्दाश्चत्वार्येव प्रमाणानि ।**

[इति दीपिकायां शब्दपरिच्छेदः]

**नन्वि**ति । यत्र यत्र आकाङ्क्षादिमत्पदकदम्बकत्वं तत्र तत्र स्मारितार्थसंसर्गज्ञानपूर्वकत्वं यथा मद्वाक्ये 'गामानय' इत्यादौ, तथा एतेष्वपि पदेषु इति । **अनुमिती**ति-अनुमित्यपेक्षया विजातीयस्य शाब्दबोधस्य सर्वसम्मतत्वं वर्तते । अनुमितौ धूमादग्निमनुमिनोमीत्यनुव्यवसायः, अत्र तु 'शब्दादिममर्थं प्रत्येमि' इत्यनुव्यवसायः अयमेव विलक्षणत्वे साक्षी बोध्यः ।

**नन्वि**ति । **देवदत्त** इत्यादि देवदत्तः पक्षः, रात्रिभोजनं साध्यते, दिवा तु भुञ्जानत्वे सति पीनत्वं हेतुः, दिवा रात्रावभोजी दृष्टान्तः । अत्र केवलव्यतिरेकि अनुमानम्-यत्र यत्र रात्रिभोजनाभावः तत्र तत्र दिवाऽभुञ्जानत्वे सति पीनत्वाभावः यथा दिवारात्रावभोजिनि पुरुषे, न चात्र देवदत्ते तथा तस्मान्न तथेति । अनेनानुमानेन रात्रिभोजनं सिद्धम् ।

**शते** इति अधिकसङ्ख्यायां न्यूनसङ्ख्या वर्तते, अत्र सम्भवाख्यं प्रमाणान्तरं कैश्चिन्मन्यते तन्न इत्यर्थः ।

**इहे**ति-अज्ञातो मूलवक्ता यस्य स अज्ञातमूलवक्तृकः शब्द एवात्र



प्रमाणम् ।

**चेष्टे**ति । भ्रूक्षेप-हस्तविन्यास-शिरोधूननादिका चेष्टा तया कृत्वा परस्य शाब्दबोधो जायते, यद्वाऽनुमितिर्जायते, अतः चेष्टायाः प्रमाणान्तरत्वं नास्तीत्यर्थः ।

[अथ प्रामाण्यविचारः]

**अथ ज्ञानानां 'तद्वति तत्प्रकारकत्वं स्वतो ग्राह्यं परतो वा इति विचार्यते । तत्र विप्रतिपत्तिः 'ज्ञानप्रामाण्यं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यं न वा ? अत्र विधिकोटिः स्वतस्त्वम्, निषेधकोटिः परतस्त्वम् । अनुमानग्राह्यत्वेन सिद्धसाधनवारणाय यावदिति । 'इदं ज्ञानम् अप्रमा' इति ज्ञानेन प्रामाण्यग्रहाद् बाधवारणाय अप्रामाण्याग्राहकेति । 'इदं ज्ञानम् अप्रमा' इति अनुव्यवसायनिष्ठप्रामाण्यग्राहकस्य अप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वं न स्याद् अतः तदिति । तस्मिन् ग्राह्यप्रामाण्याश्रये अप्रामाण्याग्राहकेत्यर्थः । उदाहृतस्थले व्यवसाये अप्रामाण्यग्राहकस्याप्यनुव्यवसाये तदग्राहकत्वात् स्वतस्त्वसिद्धिः । ननु स्वत एव प्रामाण्यं गृह्यते 'घटमहं जानामि' इत्यनुव्यवसायेन घटघटत्वयोरिव तत्सम्बन्धस्यापि विषयीकरणात्, व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् । पुरोवर्तिनि प्रकारसम्बन्धस्यैव प्रमात्वपदार्थत्वाद् इति चेत् ? न, स्वतः प्रामाण्यग्रहे 'जलज्ञानं प्रमा न वा' इत्यनभ्यासदशायां प्रमात्वसंशयो न स्यात् । अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् । तस्मात् स्वतोग्राह्यत्वाभावात् परतोग्राह्यत्वम् । तथाहि-प्रथमं जलज्ञानानन्तरं प्रवृत्तौ सत्यां जललाभे सति 'पूर्वोत्पन्नं ज्ञानं प्रमा, समर्थप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवं यथा अप्रमा' इति व्यतिरेकिणा प्रमात्वं निश्चीयते । द्वितीयादिज्ञानेषु पूर्वज्ञानदृष्टान्तेन तत्सजातीयत्वलिङ्गेन अन्वयव्यतिरेकिणापि गृह्यते । प्रमाया गुणजन्यत्वम् उत्पत्तौ परतस्त्वम् । प्रमाऽसाधारणकारणं गुणः । अप्रमाऽसाधारणकारणं दोषः । तत्र प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः । अनुमितौ**

**व्यापकवति व्याप्यज्ञानम् । उपमितौ यथार्थसादृश्यज्ञानम् । शाब्दज्ञाने यथार्थयोग्यताज्ञानम्, इत्याद्यूहनीयम् । पुरोवर्तिनि प्रकाराभाव-स्यानुव्यवसायेनानुपस्थितत्वात् अप्रमात्वं परत एव गृह्यते । पित्तादिदोषजन्यत्वम् उत्पत्तौ परतस्त्वम् । ननु सर्वेषां ज्ञानानां यथार्थत्वात् अयथार्थज्ञानमेव नास्तीति । न च 'शुक्तौ इदं रजतम्' इति ज्ञानात् प्रवृत्तिदर्शनाद् अन्यथाख्यातिसिद्धिः इति वाच्यम्, रजतस्मृतिपुरोवर्तिज्ञानाभ्यामेव प्रवृत्तिसम्भवात् । उपस्थितेष्ट-भेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेन 'नेदं रजतम्' इत्यादौ अतिप्रसङ्गा-भावाद् इति चेत् ? न, सत्यरजतस्थले पुरोवर्तिविशेष्यकरजतत्व-प्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकतया शुक्तावपि रजतार्थिप्रवृत्ति-जनकत्वेन विशिष्टज्ञानस्यैव कल्पनात् ।**

[इति तर्कदीपिकायां प्रामाण्यविचारः]

**ज्ञानाना**मिति । अथ ज्ञाननिष्ठं तद्वति तत्प्रकारकत्वरूपं प्रामाण्यं स्वतो ग्राह्यं परतो वा इति विचार्यते । **तत्रे**ति-तत्रैतत् संशयजनकं वाक्यम् । **ज्ञाने**ति-तस्मिन्प्रामाण्याश्रयेऽप्रामाण्यस्य अग्राहिका या यावती ज्ञानग्राहिका सामग्री तद्ग्राह्यं ज्ञानप्रामाण्यम्, एषा विधिकोटिः । तद्ग्राह्यत्वाभाववद् इति निषेधकोटिः । अत्र विधिकोटि**र्मीमांसकानां**, निषेधकोटि**र्नैयायिकानाम्** । तत्र **मीमांसकानां** मतत्रयम्-प्रभाकरमतम् १, मुरारिमिश्रमतम् २, भट्टमतम् ३ । त्रिष्वपि मतेषु स्वतस्त्वमस्ति परं सामग्र्यां भेदः, यथा प्रभाकरमते ज्ञानमेव ज्ञानग्राहिका सामग्री १, मुरारिमिश्रमते अनुव्यवसायो ज्ञानग्राहिका सामग्री २, भट्टमते ज्ञाततालिङ्ग-कमनुमानं ज्ञानग्राहिका सामग्री ३ । ज्ञाततालिङ्गकमनुमानं यथा घटो ज्ञातः घटविषयकज्ञाततावत्त्वात् । ज्ञानेन विषये ज्ञातता जन्यते । ततो ज्ञाततया कृत्वा ज्ञानमनुमीयते, ज्ञानस्यातीन्द्रियत्वेनाप्रत्यक्षत्वात् । अथ विप्रतिपत्तिशरीरे **यावत्**पदं किमर्थं, तत्राह **अनुमाने**ति । तस्मिन्नप्रामाण्यग्राहिका ज्ञानग्राहिका च सामग्री का वा भवति ? अनुमानं तद्ग्राह्यत्वं प्रामाण्यस्य मतत्रयेऽपि सिद्धं वर्तते । ततश्च विधिकोटौ सिद्धसाधनं दोषः । निषेधकोटौ बाधः । अतो **यावदि**ति-अथानुमानग्राह्यत्वं सिद्धमस्ति, परं यावती ज्ञानग्राहिका सामग्री अनुव्यवसायादिका



तद्ग्राह्यत्वं सिद्धं नास्ति, अतो न दोषः । इदमिति-**अप्रामाण्याग्राहिके**ति-[ग्राहकेति]पदं नोच्यते चेत् विधिकोटौ बाधः, निषेधकोटौ सिद्धसाधनं स्यात् । तथा हि शुक्तौ 'इदं रजतम्' इति भ्रमज्ञाने अप्रामाण्यग्राहकः 'इदं ज्ञानमप्रमा' इत्यनुव्यवसायोऽस्ति । अथ इदं ज्ञानं 'यावद्ज्ञानग्राहिकासामग्री[ग्राह्यम्] अस्ति, परं प्रामाण्यग्राहकं नास्ति अतो बाधः तद्वारणाय **अप्रामाण्यग्राहके**ति । इदं ज्ञानमप्रमाण्याग्राहकं नास्तीत्यतो न दोषः । इदमिति-अथ शुक्ताविति भ्रमज्ञानेऽप्रामाण्यं, तथाऽस्य य इदमित्याद्यनुव्यवसायस्तत्र प्रामाण्यमस्ति । अथैतत्प्रामाण्यस्य ग्राहकः 'इदं ज्ञानमप्रमेति ज्ञानवानहम्' इत्यनुव्यवसायोऽस्ति सः व्यवसायनिष्ठप्रामाण्यं गृह्णाति, अनुव्यवसायनिष्ठं प्रामाण्यमपि गृह्णाति तेनाऽस्य तृतीयज्ञानस्य अप्रामाण्यग्राहकत्वं नास्ति । ततश्चानुव्यवसायनिष्ठप्रामाण्यस्य स्वतो ग्राह्यत्वं नायाति अतः तदिति । अग्रेतनं सुगमम् । **नन्वि**ति-ननु प्रामाण्यस्य स्वत एव ग्राह्यत्वं कुतः ? इत्याह-**घट**मिति । अयं घट इति ज्ञानं प्राग्जातं, तदनन्तरं 'घटमहं जानामि' इत्यनुव्यवसायो भवति । अथायम् अनुव्यवसायो यथा घटघटत्वे विषयीकरोति तथा घटे यो घटत्वसमवायः तमपि विषयीकरोति । तत्र हेतुमाह-**व्यवसाये**ति । अयं घट इति ज्ञानलक्षणायाः प्रत्यासत्तेरुभयत्र तुल्यत्वात् प्रामाण्यं किमुच्यते तदाह-पुरोवर्तिनि पदार्थे घटादौ यो घटत्वादिसमवायः स एव प्रामाण्यपदार्थः । एतेन स्वतोग्राह्यत्वं दृढीकृतम् ।

अथास्य खण्डनम् । **स्वत** इति-इदं जलमिति प्राथमिकजलज्ञानान्तरं 'जलज्ञानवानहम्' इत्यनुव्यवसायो भवति, तदनन्तरम् इदं जलज्ञानं प्रमात्मकं वा न इति अनावृत्तिदशायां प्रमात्वसंशयः सर्वानुभवसिद्धो वर्तते । अत्र संशयः कीदृग्भवति तदुच्यते, इदंत्वावच्छिन्नविशेष्यकप्रामाण्याभावप्रकारकः संशयः इति । अथ यदि स्वतः प्रामाण्यग्रहः स्यात् तर्हि अयं संशयो न स्यात् । कुत इत्याह-**अनुव्यवसायेने**ति । अथ स्वमतं स्थापयति-**तथा ही**ति-इदं जलमिति प्रथमं जलज्ञानं जातं, तदनन्तरं जलार्थिनः प्रवृत्तिः स्यात् । ततश्च जललाभे सति सोऽनुमानं करोति । तत्र पूर्वोत्पन्नं जलज्ञानं पक्षः, प्रमात्वं साध्यते, समर्थप्रवृत्तिजनकत्वं हेतुः । अत्र अन्वयव्याप्तिर्नास्ति दृष्टान्ताभावात् । यन्नैवं=प्रमात्मकं न, तन्नैवं=समर्थप्रवृत्तिजनकमपि न इत्यर्थः, यथाऽप्रमात्मकं ज्ञानम् इति व्यतिरेकिणाऽनुमानेन प्रामाण्यमनुमीयते गृह्यते इत्यर्थः । द्वितीयादिज्ञानेषु

अन्वयव्यतिरेकिणापि प्रामाण्यं गृह्यते यथा 'इदं जलज्ञानं' पक्षः, प्रमात्वं साध्यते, तत्सजातीयत्वं लिङ्गं नाम, समर्थप्रवृत्तिजनकत्वं हेतुः, पूर्वज्ञानं दृष्टान्त इति ।

प्रवृत्तिर्द्विविधा-संवादिनी विसंवादिनी च । तत्र संवादिनी समर्था-सफलेति यावत् । विसंवादिनी-असमर्था-विफला इति प्रामाण्ये परतो ग्राह्यत्वमुक्तम् । प्रमाया उत्पत्तौ गुणजन्यत्वं परतस्त्वम्, अप्रमाया उत्पत्तौ दोषजन्यत्वं परतस्त्वम् । प्रमा चतुर्धा, ततो गुणानामपि चातुर्विध्यं तदाह-**तत्रे**ति । प्रत्यक्षप्रमायां विशेषणवद् यद्विशेष्यं तेन सह यः इन्द्रियसन्निकर्षः स गुणः । अनुमितौ साध्यवति पक्षे साधनज्ञानं गुणः । **योग्यते**ति-एकपदार्थेऽपरपदार्थवत्त्वं योग्यता । शुक्तौ 'इदं रजतम्' इत्यादिभ्रमज्ञानेऽप्रामाण्यं तदपि परतोग्राह्यम्, शुक्तौ 'इदं रजतम्' इत्यत्र पुरोवर्तिनी इदं पदार्थे रजतत्वाभावस्य ज्ञानेनानुपस्थितत्वात् । अत्र 'इदं ज्ञानमप्रमा विसंवादिप्रवृत्तिजनकवाद्' इत्याद्युह्यम् । अप्रमाया उत्पत्तौ पित्तादिदोषजन्यत्वं परतस्त्वम् ।

**नन्वि**ति । **न चेति**-प्रवृत्तिं प्रति विशिष्टज्ञानत्वेन कारणताऽस्ति । अथ शुक्तौ 'इदं रजतम्' इति ज्ञानादपि रजतार्थिनः प्रवृत्तिर्दृश्यतेऽतो भ्रमज्ञानसिद्धिरिति न वाच्यम्, एतादृशस्थले विशिष्टज्ञानं कारणं न स्वीक्रियते किन्तु अगृहीतभेद-ग्रहणस्मरणात्मकं ज्ञानद्वयं प्रवृत्तिं प्रति कारणं तेन न भ्रमज्ञानसिद्धिः । ***ननु*** 'नेदं रजतम्' इत्यादौ ग्रहणस्मरणात्मकं ज्ञानद्वयं वर्ततेऽतस्तत्रापि प्रवृत्त्यापत्ति-रूपोऽतिप्रसङ्ग इति चेत् ? ***न,*** उपस्थिते 'इदं' पदार्थे इष्टं रजतं, तस्य भेदोऽन्योन्याभावः, तस्याग्रहो ज्ञानाभावः, तस्यैव प्रवृत्तिजनकत्वं स्वीकृतम्, तेनोक्तप्रयोगे नातिप्रसङ्गः । तत्र उपस्थितेष्टभेदस्य ज्ञानाभावो नास्ति, ज्ञानं वर्तते इत्यर्थः । एतेन सर्वज्ञानानां यथार्थत्वं दृढीकृतम् ।

अथास्य खण्डनम् **सत्ये**ति-उपस्थितेष्टभेदाग्रहस्य प्रवृत्तिं प्रति कारणत्वे गौरवं स्यात्, अतो लाघवार्थं पुरोवर्तिविशेष्यकरजतत्वप्रकारकज्ञानमेव प्रवृत्तिं प्रति कारणं स्वीकर्तव्यम् । ततश्च सत्यं यद्रजतस्थलं तत्र तु इदं ज्ञानं प्रवृत्तिं प्रति कारणम्, परं शुक्तार्थिनः प्रवृत्तिं प्रति कारणम् इति भ्रमज्ञानसिद्धिः ।

[इति प्रामाण्यविचारः]



[अयथार्थानुभवविभागः]

## अयथार्थानुभवस्त्रिविधः । संशयविपर्ययतर्कभेदात् ।

**अयथार्थानुभवं विभजते-अयथार्थ इति । स्वप्नस्य मानस-विपर्ययरूपत्वात् न त्रैविध्यविरोधः ।**

[संशयलक्षणम्]

## एकस्मिन् धर्मिणि विरुद्धनानाधर्मवैशिष्ट्यावगाहि ज्ञानं संशयः । यथा स्थाणुर्वा पुरुषो वा इति ।

**संशयलक्षणमाह-एकेति । 'घटपटौ' इति समूहालम्बनेऽति-व्याप्तिवारणाय एकेति । 'घटो द्रव्यम्' इत्यादौ अतिव्याप्तिवारणाय विरुद्धेति । पटत्वविरुद्धघटत्ववान् इत्यत्र अतिव्याप्तिवारणाय नानेति ।**

संशयलक्षणमाह-**एके**ति । एकस्मिन् धर्मिणि विरुद्धनानावैशिष्ट्याव-गाहिज्ञानत्वं संशयत्वम् । **घटो द्रव्य**मिति-अत्र घटे घटत्वं वर्तते परमनयोर्विरोधो नास्ति, सहावस्थानमित्युक्तत्वात् । **पटत्वे**ति-अत्र 'इदं'पदार्थो धर्मी । ***ननु*** संशयस्य का वा सामग्री इति चेत् ? ***उच्यते,*** धर्मिज्ञानं १, कोटिस्मृतिः २, उभयकोटिसहचरितधर्मवत्ताज्ञानं च ३ । संशयं प्रति अन्यतरकोटिनिर्णयः प्रतिबन्धकः ।

[विपर्ययलक्षणम्]

## मिथ्याज्ञानं विपर्ययः । यथा शुक्तौ इदं रजतम् इति ।

**विपर्ययलक्षणमाह-मिथ्येति । तदभाववति तत्प्रकारकनिश्चय इत्यर्थः ।**

[तर्कलक्षणम्]

**व्याप्यारोपेण व्यापकारोपस्तर्कः । यथा 'यदि वह्निर्न स्यात् तर्हि धूमोऽपि न स्याद्' इति ।**

**तर्कलक्षणमाह-व्याप्येति । यद्यपि तर्को विपर्ययेऽन्तर्भवति तथापि प्रमाणानुग्राहकत्वाद् भेदेन कीर्तनम् ।**

तर्कं लक्षयति-**व्याप्ये**ति । तर्कस्य व्यभिचारशङ्कानिवारकत्व-द्वाराऽनुमानप्रमाणे उपयोगित्वमस्ति, तेन विपर्ययादयं पृथगुक्तः ।

[स्मृतिविभागः]

**स्मृतिरपि द्विविधा । यथार्था अयथार्था चेति । प्रमाजन्या यथार्था । अप्रमाजन्या अयथार्था ।**

**स्मृतिं विभजते-स्मृतिरिति ।**

[समाप्तं बुद्धिनिरूपणम्]

[सुखनिरूपणम्]

**सर्वेषामनुकूलतया वेदनीयं सुखम् ।**

**सुखं लक्षयति-सर्वेषामिति । 'सुख्यहम्' इत्याद्यनु-व्यवसायगम्यं सुखत्वादिकमेव लक्षणम् । यथाश्रुतं तु स्वरूप-कथनमिति द्रष्टव्यम् ।**

**सर्वेषामि**ति । सुखत्वादिजातिमत्त्वं सुखादित्वम् ।

[दुःखनिरूपणम्]

**प्रतिकूलतया वेदनीयं दुःखम् ।**

**इच्छा कामः । क्रोधो द्वेषः । कृतिः प्रयत्नः ।**



[धर्माधर्मनिरूपणम्]

**विहितकर्मजन्यो धर्मः । निषिद्धकर्मजन्योऽधर्मः ।**

[बुद्ध्यादीनामात्ममात्रविशेषगुणकथनम्]

**बुद्ध्यादयो अष्टौ आत्ममात्रविशेषगुणाः बुद्धि-इच्छाप्रयत्नाः नित्या अनित्याश्च । नित्या ईश्वरस्य । अनित्या जीवस्य ।**

[संस्कारविभागः]

**संस्कारस्त्रिविधः । वेगो भावना स्थितिस्थापक-श्चेति ।**

**संस्कारं विभजते-संस्कार इति । संस्कारत्वजातिमान् संस्कारः ।**

[वेगनिरूपणम्]

**वेगः पृथिव्यादिचतुष्टयमनोमात्रवृत्तिः ।**

**वेगस्याश्रयमाह-वेग इति । वेगत्वजातिमान् वेगः ।**

[भावनानिरूपणम्]

**अनुभवजन्या स्मृतिहेतुर्भावना, आत्ममात्रवृत्तिः ।**

**भावनां लक्षयति-अनुभवेति । अनुभवध्वंसे अतिव्याप्ति-वारणाय स्मृतीति । आत्मादौ अतिव्याप्तिवारणाय अनुभवेति । स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तम् ।**

**स्मृतेरि**ति-अनुभवस्य संस्कारजनकत्वं **प्राचां** मतेऽपि, परं **नव्यानां** मते स्मृतेरपि संस्कारजनकत्वम् ।

[स्थितिस्थापकनिरूपणम्]

**अन्यथाकृतस्य पुनस्तदवस्थाऽऽपादकः स्थिति-स्थापकः कटादिपृथिवीवृत्तिः ।**

[इति गुणाः]

**स्थितिस्थापकं लक्षयति-अन्यथेति ।**

**सङ्ख्यादयोऽष्टौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्य-गुणाः । अन्ये रूपादयो विशेषगुणाः । द्रव्यविभाजकोपाधिद्वय-समानाधिकरणावृत्तिजातिमत्त्वं विशेषगुणत्वम् ।**

**द्रव्ये**ति-द्रव्यविभाजका नवोपाधयः पृथिवीत्वादयः, तन्मध्ये द्रव्य-विभाजकं यदुपाधिद्वयं पृथिवीत्वं जलत्वं च तत्समानाधिकरणं किं भवति ? द्रव्यत्वम्, सत्ता संयोगविभागादयः, सामान्यगुणाश्च, रूपादयस्तु उपाधिद्रव्य-समानाधिकरणा न भवन्ति, तेषां प्रत्येकवर्तित्वात् । अथ तत्र अवृत्तयो या जातयो रूपत्वादयः, तद्वत्त्वं, विशेषगुणत्वम् ।

[इति तर्कदीपिकायां गुणपदार्थः]

[कर्मनिरूपणम्]

**चलनाऽऽत्मकं कर्म । ऊर्ध्वदेशसंयोगहेतुरुत्क्षे-पणम् । अधोदेशसंयोगहेतुरपक्षेपणम् । शरीरसन्निकृष्ट-संयोगहेतुराकुञ्चनम् । शरीरविप्रकृष्टसंयोगहेतुः प्रसारणम् । अन्यत् सर्वं गमनम् ।**

**कर्मणो लक्षणमाह-चलनेति । उत्क्षेपणादीनां कार्यभेदमाह ऊर्ध्वेति । शरीरेति-वक्रतासम्पादनं कर्म आकुञ्चनम्, ऋजुतासम्पादकं प्रसारणमित्यर्थः ।**

पृथिव्यादिचतुष्टयमनोमात्रवृत्ति कर्म । पृथिव्यादिचतुष्टयमनोऽतिरिक्ता-



वृत्तित्वे सति पृथिव्यादिचतुष्टमनोवृत्तित्वं पृथिव्यादिचतुष्टयमनोमात्रवृत्तित्वम् ।

[सामान्यनिरूपणम्]

**नित्यमनेकानुगतं सामान्यम् । द्रव्यगुणकर्मवृत्ति । तद् द्विविधं परापरभेदात् । परं सत्ता, अपरं द्रव्यत्वादि ।**

**सामान्यं लक्षयति-नित्यमिति । संयोगेऽतिव्याप्तिवारणाय नित्यमिति । परमाणुपरिमाणादौ अतिव्याप्तिवारणाय-अनेकेति । अनुगतत्वं समवेतत्वम् । घटाद्यत्यन्ताभावो घटाद्यनुगतोऽपि असमवेत इति न अभावादौ अतिव्याप्तिः ।**

**नित्य**मिति । नित्यत्वे सति अनेकानुगतत्वं सामान्यस्य लक्षणम् । द्वित्वादिसङ्ख्यासंयोगादौ अतिव्याप्तिवारणाय सत्यन्तम् । अथ परमाणुपरिमाणादौ अतिव्याप्तिवारणाय विशेष्यदलम् । अनेकानुगतत्वं नाम अनेकवृत्तित्व-मित्युच्यते चेत्, अत्यन्ताभावान्योन्याभावयोरतिव्याप्तिः, तयोर्नित्यत्वे सति अनेकवृत्तित्वमस्ति, अतोऽनेकसमवेतत्वमिति वक्तव्यम् । अतः परं न दोषः ।

[विशेषनिरूपणम्]

**नित्यद्रव्यवृत्तयो व्यावर्तका विशेषाः ।**

**विशेषं लक्षयति-नित्येति ।**

[समवायनिरूपणम्]

**नित्यसम्बन्धः समवायः । अयुतसिद्धवृत्तिः । ययोर्द्वयोर्मध्ये एकमविनश्यत्तदवस्थमपराश्रितमेवावतिष्ठते तौ अयुतसिद्धौ । यथा अवयवाऽवयविनौ, गुणगुणिनौ, क्रियाक्रियावन्तौ, जातिव्यक्ती, विशेषनित्यद्रव्ये चेति ।**

**समवायं लक्षयति-नित्येति । संयोगे अतिव्याप्तिवारणाय नित्येति । आकाशादौ अतिव्याप्तिवारणाय सम्बन्ध इति ।**

**अयुतसिद्धलक्षणमाह-ययोरिति । 'नीलो घटः' इति विशिष्टप्रतीतिः-विशेषणविशेष्यसम्बन्धविषया विशिष्टप्रत्यत्वात् दण्डीतिप्रत्ययवद् इति समवायसिद्धिः । अवयवावयविनाविति । द्रव्यसमवायिकारणम् अवयवः । तज्जन्यं द्रव्यमवयवि ।**

[इति समवायपदार्थः]

**नित्य** इति-नित्यत्वे सति सम्बन्धत्वं समवायसम्बन्धत्वम् । सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षं कारणं यथा भूतलघटसंयोगे सम्बन्धप्रत्यक्षे वर्तते । घटाकाशसंयोगस्य प्रत्यक्षापत्तिवारणाय यावदिति । ***ननु*** समवायस्तु अतीन्द्रियोऽस्ति अतस्तत्सत्वे किं प्रमाणमिति चेत् ? ***उच्यते,*** अत्रानुमानं प्रमाणमस्ति, तद् यथा **नील** इति-यथा दण्डविशिष्टपुरुषे विशिष्टप्रत्ययत्वं वर्तते, विशेषणविशेष्यसम्बन्धविषयत्वमपि वर्तते, विशेषणं दण्डः, विशेष्यः पुरुषः, तयोः संयोगसम्बन्धः, तथा विशिष्टप्रत्ययत्वं 'नीलो घट' इति विशिष्टप्रतीतौ वर्तते । ततश्च विशेषणविशेष्यसम्बन्धविषयत्वमपि वर्तते । तत्र नीलरूपं विशेषणं, घटो विशेष्यः, तयोर्यः सम्बन्धः, संयोगस्तु न भवति, गुणद्रव्य-योस्तदभावात्, द्रव्ययोरेव संयोग इत्युक्तत्वात्, तस्मादत्र संयोगातिरिक्तः कश्चन सम्बन्धः सिद्धः । स समवायो भवति इति समवायसिद्धिः ।

[अभावनिरूपणम्]

**अनादिः सान्तः प्रागभावः । उत्पत्तेः पूर्वं कार्यस्य । सादिरनन्तः प्रध्वंसः । उत्पत्त्यनन्तरं कार्यस्य ।**

**त्रैकालिकसंसर्गावच्छिन्नप्रतियोगिताकोऽत्यन्ताभावः । यथा भूतले घटो नास्तीति ।**

**तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकोऽन्योन्याभावः । 'यथा घटः पटो न' इति ।**

**प्रागभावं लक्षयति-अनादिरिति । आकाशादौ अति-**



**व्याप्तिवारणाय सान्त इति । घटादौ अतिव्याप्तिवारणाय अनादि-रिति । प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः 'भविष्यति' इति व्यवहारहेतुः प्रागभावः ।**

**ध्वंसं लक्षयति-सादिरिति । घटादौ अतिव्याप्तिवारणाय अनन्त इति । आकाशादौ अतिव्याप्तिवारणाय सादिरिति । प्रतियोगिजन्यः प्रतियोगिसमवायिकारणवृत्तिः ध्वस्त इति व्यवहारहेतुः ध्वंसः ।**

**अत्यन्ताभावं लक्षयति-त्रैकालिकेति । अन्योन्याभावे अति-व्याप्तिवारणाय संसर्गावच्छिन्नेति । ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिकेति ।**

**अन्योन्याभावं लक्षयति-तादात्म्येति । प्रतियोगितावच्छेद-कारोप्यसंसर्गभेदात् एकप्रतियोगिकयोरत्यन्ताभावान्योन्याभाव-योर्बहुत्वम् । 'केवलदेवदत्ताभावात् दण्ड्यभावः' इति प्रतीत्या विशिष्टाभावः । 'एकसत्त्वेऽपि द्वौ न स्तः' इति प्रतीत्या द्वित्वा-वच्छिन्नाभावः । संयोगसम्बन्धेन च घटवति समवायसम्बन्धेन घटाभावः । तत्तद्घटाभावाद् घटत्वावच्छिन्नप्रतियोगिताकसामान्या-भावाश्चातिरिक्तः । एवमन्योन्याभावोऽपि 'घटत्वेन घटो नास्ति' इति व्यधिकरणधर्मावच्छिन्नाभावो नाङ्गीक्रियते । घटे घटत्वं नास्तीति तस्यार्थः । अतिरिक्तत्वे स केवलान्वयी । सामयिकाभावो-ऽप्यत्यन्ताभाव एव समयविशेषे प्रतीयमानः । घटाभाववति घटानयने अत्यन्ताभावस्य अन्यत्र गमनाभावेऽपि अप्रतीतेर्घटापसरणे सति प्रतीतेर्भूतले घटसंयोगप्रागभावध्वंसयोर्घटात्यन्ताभावप्रतीतिनियामकत्वं कल्प्यते । घटवति तत्संयोगप्रागभावध्वंसयोः असत्त्वाद् अत्यन्ता-भावस्याप्रतीतिः । घटापसरणे च संयोगध्वंससत्त्वात् प्रतीतिरिति ।**

**''केवलाधिकरणादेव नास्तीति व्यवहारोपपत्तौ अभावो न पदार्थान्तरम्'' इति गुरवः । तन्न, अभावानङ्गीकारे केवलस्य निर्वक्तु-**

**मशक्यत्वात् । अभावाभावो भाव एव, नातिरिक्तः, अनवस्था-प्रसङ्गात् । ''ध्वंसप्रागभावः प्रागभावध्वंसश्च प्रतियोग्येव'' इति प्राञ्चः । ''अभावाभावस्तु अतिरिक्त एव, तृतीयाभावस्य प्रथमाभाव-रूपत्वात् न अनवस्था'' इति नवीनाः ॥**

[इति अभावपदार्थः]

**अनादि**रिति-प्रतियोगी घटः, तत्समवायिकारणं मृत्पिण्डादि, तत्र घटप्रागभावो वर्तते, पुनः स घटस्य जनकः, 'पुनर्घटो भविष्यति' इति व्यवहारहेतुश्च । ध्वंसोऽपि प्रतियोगिसमवायिकारणवृत्तिः, 'अयं ध्वंसः' इति व्यवहारहेतुश्च । त्रैकालिकत्वे सति संसर्गावच्छिन्नप्रतियोगिताकत्वम् अत्यन्ता-भावत्वम् । अन्योन्याभावेऽतिव्याप्तिवारणाय तादात्म्यातिरिक्तसंसर्गावच्छिन्नेति वाच्यम् । **प्रतियोगिते**ति-घटात्यन्ताभावस्य प्रतियोगी घटः, घटान्योन्याभावस्यापि प्रतियोगी घटः, एवम् एकः प्रतियोगी ययोस्तौ एकप्रतियोगिकौ, तयोः अत्यन्ता भावान्योन्याभावयोः को भेदः ? तत्रोच्यते, अनयोर्नानात्वमस्ति, कुतः ? संसर्गभेदात् । तथा हि प्रतियोगी घटः, प्रतियोगिता घटे, प्रतियोगितावच्छेदकं घटत्वम् । अथ यथा प्रतियोगितावच्छेदको धर्मः तथा तादृश आरोप्य-संसर्गोऽप्यस्ति, तस्य भेदो वर्तते । यथाऽत्यन्ताभावे संयोगसमवायात्मकः, अन्योन्याभावे तादात्म्यात्मकः, अयं भेदो बोध्यः । **तत्त**दिति-श्यामरक्तादि-घटाभावाद् घटत्वावच्छिन्नः प्रतियोगी यस्य स घटत्वावच्छिन्नप्रतियोगिकः, तादृशो यो घटसामान्याभावः, सोऽतिरिक्तः । एवं श्यामरक्तादिघटान्योऽन्याभावाद् घटसामान्योऽन्याभावोऽतिरिक्तः । घटत्वेन पटो नास्तीति व्यवहारेण व्यधि-करणधर्मावच्छिन्नाभावः कैश्चित् पृथङ् मन्यते, ***तन्न,*** अत्यन्ताभावेनैव गतार्थत्वात् । अतिरिक्तत्वे सति तु अभिधेयत्वप्रमेयत्वादिवत् केवलान्वयी समये समये उत्पद्यते नश्यति च । एतादृशो योऽभावः सोऽप्यत्यन्ताभाव एव । **भूतले**ति-भूतलघटसंयोगप्रागभावस्य भूतलघटसंयोगप्रध्वंसस्य चेत्यर्थः । **प्रतीति**रिति-अत्यन्ताभावस्येति शेषः । **केवले**ति-घटाभावो भूतलस्वरूप एव नातिरिक्त इति **प्राभाकराः,** तन्न, अभावो नाङ्गीक्रियते चेत् कैवल्यं निर्वचनं कर्तुं न शक्यते, अतः स स्वीकर्तव्य एवेत्यर्थः । **ध्वंसेति**-घटध्वंसस्य प्रागभावो



घट एव, घटप्रागभावस्य ध्वंसोऽपि घट एवेत्यर्थः । अत्र **नव्या** आहुः **अभावे**ति ।

[अन्येषां पदार्थानां सप्तपदार्थान्तर्भावप्रदर्शनम्]

**सर्वेषामपि पदार्थानां यथायथम् उक्तेषु अन्तर्भावात् सप्तैव पदार्था इति सिद्धम् ।**

**काणादन्यायमतयोर्बालव्युत्पत्तिसिद्धये ।**
**अन्नम्भट्टेन विदुषा रचितस्तर्कसङ्ग्रहः ॥**

[अथ प्रमाणप्रमेयादिषोडशपदार्थानां सप्तपदार्थेष्वन्तर्भावप्रदर्शनम्]

**ननु 'प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्त-सिद्धान्त-ऽवयवतर्क निर्णय-वाद-जल्प-वितण्डा-हेत्वाभासछल-जाति-निग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगमः' [ ] इति न्यायशास्त्रे षोडशपदार्था-नामुक्तत्वात् कथं सप्तैव इत्यत आह-सर्वेषामिति । सर्वेषां सप्तस्वेवान्तर्भाव इत्यर्थः । 'आत्मशरीरेन्द्रियार्थबुद्धिमानःप्रवृत्तिदोष-प्रेत्यभावफल-दुःखापवर्गास्तु प्रमेयम्' [ ] इति द्वादशविधं प्रमेयम् । प्रवृत्तिर्धर्माधर्मौ । रागद्वेषमोहा दोषाः । द्वेषो मन्युः । मोहः शरीरादौ आत्मत्वभ्रमः । प्रेत्यभावो मरणम् । फलं भोगः । अपवर्गो मोक्षः, स च स्वसमानाधिकरणदुःखप्रागभावासमानकालीनदुःख-ध्वंसः । प्रयोजनं सुखप्राप्तिः, दुःखहानिश्च । दृष्टान्तो महानसादिः । प्रामाणिकत्वेन अभ्युपगतोऽर्थः सिद्धान्तः । निर्णयो निश्चयः । स च प्रमाणफलम् । तत्त्वबुभुत्सोः कथा वादः । उभयसाधनवती विजिगीषुकथा जल्पः । स्वपक्षस्थापनहीना वितण्डा । कथा नाम-नानावक्तृकः पूर्वोत्तरपक्षप्रतिपादकवाक्यसन्दर्भः । अभिप्रायान्तरेण प्रयुक्तस्यार्थान्तरं प्रकल्प्य दूषणं छलम् । असदुत्तरं जातिः । साधर्म्य-**

वैधर्म्य-उत्कर्षा-पकर्ष-वर्ण्यावर्ण्य-विकल्प-साध्य-प्राप्त्यप्राप्ति-प्रसङ्ग-प्रतिदृष्टान्ताऽनुत्पत्ति-संशय-प्रकरणाऽहेत्वर्थापत्त्यविशेषोपपत्त्यु-पलब्ध्यनुपलब्धि-नित्यानित्य-कार्यसमजातयः । वादिनोऽपजय-हेतुर्निग्रहस्थानम् । प्रतिज्ञाहानिः, प्रतिज्ञान्तरं, प्रतिज्ञाविरोधः, प्रतिज्ञासंन्यासः, हेत्वन्तरम्, अर्थान्तरम्, निरर्थकम्, अविज्ञातार्थम्, अपार्थकम्, अप्राप्तकालं, न्यूनम्, अधिकम्, पुनरुक्तम्, अन-नुभाषणम्, अज्ञानम्, अप्रतिभा, विक्षेपः, मतानुज्ञा, पर्यनु-योज्योपेक्षणं, निरनुयोज्यानुयोगः, अपसिद्धान्तः, हेत्वाभासाश्च निग्रहस्थानानि । शेषं सुगमम् ।

ननु करतलानलसंयोगे सत्यपि, प्रतिबन्धके सति दाहानुत्पत्तेः शक्तिः पदार्थान्तरम् इति चेत् ? न, प्रतिबन्धकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयोगात् कारणत्वस्यैव शक्तिपदार्थत्वात् । ननु भस्मादिना कांस्यादौ शुद्धिदर्शनाद् आधेयशक्तिरङ्गीकार्या इति चेत् ? न, भस्मादिसंयोगसमानकालीनाऽस्पृश्यस्पर्शप्रतियोगिकयावदभाव-सहितभस्मादिसंयोगध्वंसस्य शुद्धिपदार्थत्वात् । स्वत्वमपि न पदार्थान्तरम् । यथेष्टविनियोगयोगत्वस्य स्वत्वरूपत्वात् तदवच्छेदकं च प्रतिग्रहादिलब्धत्वमेवेति ।

[विधिनिरूपणम्]

अथ विधिर्निरूप्यते । प्रयत्नजनकचिकीर्षाजनकज्ञानविषयो विधिः । तत्प्रतिपादको लिङ्गादिर्वा । कृत्यसाध्ये प्रवृत्त्यदर्शनात्, कृतिसाध्ये प्रवृत्तिदर्शनात् कृतिसाध्यताज्ञानं प्रवर्तकम् । न च विषभक्षणादौ प्रवृत्तिप्रसङ्गः, इष्टतासाधनतालिङ्गककृतिसाध्यताज्ञानस्य काम्यस्थले विहितकालशुचिजीवित्वनिमित्तज्ञानजन्यस्य नित्य नैमित्तिकस्थले, प्रवर्तकत्वात् । न चाऽननुगमः, स्वविशेषणवत्ता-प्रतिसन्धानजन्यत्वस्यानुगतत्वात् इति गुरवः । तन्न, लाघवेन कृति-



साध्येष्टसाधनताज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात् । न च नित्ये इष्टसाधनत्वाभावाद् अप्रवृत्तिप्रसङ्गः, तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलत्वकल्पनात् । तस्मात् कृतिसाधनत्वमेव लिङाद्यर्थः । ननु 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र लिङा स्वर्गसाधनकार्यं प्रतीयते, यागस्याशुतरविनाशनः कालान्तरभावि-स्वर्गसाधनत्वायोगात्, तद् योग्यं स्थायिकार्यमपूर्वमेव लिङाद्यर्थः । कार्यं कृतिसाध्यम् । कृतेः सविषयत्वाद् विषयाकाङ्क्षायां यागो विषयत्वेन अन्वेति । 'कस्य कार्यम्' इति नियोज्याकाङ्क्षायां स्वर्गकामपदं नियोज्यपरतया अन्वेति । कार्यबोद्धा नियोज्यः । तेन ज्योतिष्टोमनामकयागविषयं स्वर्गकामस्य कार्यम् इति वाक्यार्थः सम्पद्यते । वैदिकलिङ्त्वात् 'यावज्जीवम् अग्निहोत्रं जुहुयात्' इति नित्यवाक्येऽपि अपूर्वमेव वाच्यं कल्प्यते 'आरोग्यकामो भेषजपानं कुर्यात्' इत्यादौ लौकिक-लिङः क्रियाकार्ये लक्षणा इति चेत् ? न, यागस्याप्ययोग्यतानिश्चयाभावेन साधनतया प्रतीत्यनन्तरं निर्वाहार्थम् अवान्तरव्यापारतयाऽपूर्वकल्पनात् । कीर्तनादिना नाशश्रुतेर्न यागध्वंसो व्यापारः । लोकव्युत्पत्तिबलात् क्रियायामेव कृतिसाध्येष्टसाधनत्वं लिङा बोध्यत इति लिङ्त्वेन विध्यर्थकत्वम् । आख्यातत्वेन यत्नार्थकत्वम् । 'पचति' 'पाकं करोति' इति विवरणदर्शनात् । 'किं करोति ?' इति प्रश्ने 'पचति' इत्युत्तराच्च आख्यातस्य प्रयत्नार्थ-कत्वनिश्चयात् । 'रथो गच्छति' इत्यादौ अनुकूलव्यापारे लक्षणा । 'देवदत्तः पचति' 'देवदत्तेन पच्यते तण्डुलः' इत्यादौ कर्तृकर्मणोर्ना-ख्यातार्थत्वम्, किन्तु तद्गतैकत्वादीनामेव । तयोराक्षेपादेव लाभः । 'प्रजयति' इत्यादौ धातोरेव प्रकर्षे शक्तिः । उपसर्गाणां द्योतकत्वमेव न तु तत्र शक्तिरस्ति ।

पदार्थज्ञानस्य परमप्रयोजनं मोक्षः तथा हि 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति श्रुत्या श्रवणादीनां

**तत्त्वसाक्षात्कारे हेतुत्वबाधनात् श्रुत्या देहादिविलक्षणात्मज्ञाने सत्यपि असम्भावनानिवृत्तेः, युक्त्यनुसन्धानरूपमननसाध्यत्वात्, मननोपयोगिपदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयोगित्वम् । तदनन्तरं श्रुत्योपदिष्टयोगविधिना निदिध्यासने कृते, तदनन्तरं देहादिविलक्षणात्मसाक्षात्कारे सति देहादौ अहमभिमानरूपमिथ्याज्ञाननाशे सति दोषाभावात्, प्रवृत्त्यभावे धर्माधर्मयोरभावाद्, जन्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःखध्वंसरूपो मोक्षो जायते । ज्ञानमेव मोक्षसाधनम् । मिथ्याज्ञाननिवृत्तेर्ज्ञानमात्रसाध्यत्वात् । 'तमेव विदित्वाऽति मृत्युमेति, नान्यः पन्था विद्यतेऽयनाय' [ ] इति साधनानन्तरनिषेधाच्च । ननु**

**'तत्प्राप्तिहेतुर्विज्ञानं कर्म चोक्तं महामुने ।' [ ] इति**

**कर्मणोऽपि मोक्षसाधनत्वश्रवणात् ज्ञानकर्मणोः समुच्चयः इति चेत् ? न,**

**नित्यनैमित्तिकैरेव कुर्वाणो दुरितक्षयम् ।**
**ज्ञानं च विमलीकुर्वन् अभ्यासेन च पाचयेत् ॥ [ ]**

**अभ्यासात् पक्वविज्ञानं कैवल्यं लभते नरः ॥ [ ]**

**इत्यादिना कर्मणो ज्ञानसाधनत्वप्रतिपादनात् ज्ञानद्वारैव कर्म मोक्षसाधनम्, न साक्षात् । तस्मात् पदार्थज्ञानस्य न मोक्षः परमप्रयोजनम् इत्येव रमणीयम् ॥**

**इति श्रीमदन्नंभट्टोपाध्यायविरचिता तर्कसंग्रहदीपिका समाप्ता ॥**

अथ गौतमीयप्रमाणप्रमेयादिपदार्थानां सप्तपदार्थान्तर्भावः ।

**नन्वि**ति-प्रमाणं चतुर्धा । **संशयः** एकस्मिन् धर्मिणीत्यादिः । **अवयवाः**



पञ्च प्रतिज्ञादयः । **तर्को** व्याप्यारोपेणेति । **आत्मे**ति-अर्थाः-सप्त पदार्थाः । दुःखध्वंसत्वं मोक्षत्वम् एवमुच्यते चेत् अस्मादादीनामप्यात्मनि यत्किञ्चिद् दुःखध्वंसोऽस्ति तत्रापि मोक्षत्वापत्तिः, तदर्थं दुःखध्वंसे प्रागभावासमानकालीनत्वं विशेषणं निवेश्यम् । अथ अस्मादादीनामात्मनि यदा दुःखध्वंसोऽस्ति तस्मिन् काले भाविदुःखप्रागभावोऽप्यस्ति, अतो नातिव्याप्तिः । अथ शुकात्मनि वामदेवात्मनि च चरमदुःखध्वंसोऽस्ति तत्र मोक्षत्वं नायाति, कथम् ? यस्मिन्काले तयोर्दुःखध्वंसः तस्मिन्कालेऽन्येषां बद्धानां संसारिणामात्मनि दुःखप्रागभावो वर्तते, अतः स दुःखध्वंसो दुःखप्रागभावस्य समानकालीनोऽस्ति तेनाऽत्र असम्भवः, तदर्थं दुःखप्रागभावे स्वसमानाधिकरणत्वं विशेषणं निवेश्यम्, अतः परं नासम्भवः । कथम् ? स्वशब्देन संसारिजीवात्मकदुःखध्वंसः, तत्समानाधिकरणे यो दुःखप्रागभावः, तस्य समानकालीनो यो यो दुःखध्वंसः तदन्यदुःखध्वंसो मोक्षः । प्रमाणेन निश्चितोऽर्थः सिद्धान्तः । **तत्त्वे**ति-अत्र विजिगीषा नास्ति । यत्र परपक्षखण्डने तात्पर्यं स्वपक्षस्थापने तु इच्छैव नास्ति सा वितण्डा । **छल**मिति यथा नवकम्बलोऽयम् ।

**नन्वि**ति-***ननु*** वह्नौ दाहानुकूला शक्तिरस्ति, सोऽतिरिक्तः पदार्थो भवति । प्रतिबन्धके सति तन्नाशाद् दाहोत्पत्तिर्न जायते इति चेत् ? ***न,*** यथा दाहत्वावच्छिन्नं प्रति करतलानलसंयोगत्वेन कारणता तथा कार्यमात्रं प्रति प्रतिबन्धकाभावत्वेनापि कारणताऽस्ति । अत्र प्रतिबन्धकाभावरूपस्य कारणस्य नष्टत्वाद् दाहोत्पत्तिर्नेत्यर्थः । शक्तेस्तु उपयोग एव नास्ति । **नन्वि**ति-***ननु*** भस्मादिना कांस्यादौ आधारे आधेया शुद्धिर्यथा दृश्यते तथा वह्नावपि आधेयशक्तिः स्वीकार्या इति चेत् ? ***न,*** भस्मादिसंयोगस्य समानकालीनाः, अस्पृश्यस्पर्शोऽमेध्यस्पर्शः प्रतियोगी येषां ते तथोक्ता ये यावन्तो अभावाः-अस्पृश्यस्पर्शाभावाः तत्सहितो यो भस्मादिसंयोगध्वंसः स एव शुद्धिपदस्यार्थः इति भावः ।

**स्वत्व**मिति-स्वत्वं द्रव्ये, स्वामित्वं चैत्रादौ । स्वत्वं पदार्थान्तरं न भवति, किन्तु यथेच्छया विनियोगो, दानमादानं, क्रयो विक्रय इत्यादिः, तद्योग्यत्वं स्वत्वपदार्थः । यथा चैत्रीये वस्तुनि चैत्रीयं यथेष्टविनियोगयोग्यत्वं न

तु मैत्रीयमिति । यथेष्टविनियोगयोग्यतावच्छेदकं च प्रतिग्रहादिना लब्धत्वमेवेति ।

प्रवृत्तिजनिका या चिकीर्षा, चिकीर्षाजनकं यद् ज्ञानं तद्विषयो विधि-रुच्यते । यद्वा प्रवृत्तिजनकचिकीर्षाजनकज्ञानविषयप्रतिपादको लिङादिर्विधिः । कृतिसाध्यत्वप्रकारकेच्छा चिकीर्षा । प्रवृत्तेर्जनकं प्रवर्तकमुच्यते, तत्किं भवतीत्याह-**कृतीति** । मेरुशृङ्गाहरणे इच्छा त्वस्ति परं तत्कृतिसाध्यं न भवति अत 'इदं मत्कृतिसाध्यम्' इति कृतिसाध्यताज्ञानमेव प्रवर्तकम् । **न चे**ति-इदं मत्कृतिसाध्यं मदिष्टसाधनत्वात् इति ज्ञानं प्रवर्तकं बोध्यं तेन विषभक्षणं हि कृतिसाध्यं त्वस्ति परं इष्टसाधनं नास्ति ततो न तत्र प्रवृत्तिप्रसङ्गः । **इष्टे**ति-इदं काम्यस्थले प्रवर्तकम् । नित्यस्थले नैमित्तिकस्थले च प्रवृत्तिं प्रति कारणं किं भवति तदाह विहितेति । विहितं शास्त्रोक्तं यत्कालजीवित्वम् 'अस्मिन् काले इदं कार्यं कृत्वा जीवनीयम्' इति । तथा निमित्तं तज्ज्ञानजन्यं यत्कृतिसाध्यताज्ञानं तदित्यर्थः । यदकरणे प्रत्यवायस्तन्नित्यम् । **न चे**ति-***एवं*** तर्हि अनुगमो न स्यात् इति चेत् ? ***न,*** स्वविशेषणवत्ताज्ञानजन्यकृतिसाध्यताज्ञानं प्रवर्तकम्, तेन अननुगमो नास्ति इति **प्राभाकराः** । तन्न, **लाघवेने**ति-इष्टं-इच्छाविषयः कृतिसाध्य यदिष्टं, तस्य या साधनता तद्ज्ञानं सामान्यतः प्रवर्तकम् । **न च नित्ये** इति-नित्येऽपि प्रत्यवायप्रागभावपरिपालनम् । पापक्षयश्च फलं कल्प्यते । ततश्च तत्रापि इष्टसाधनत्वान्न दोषः ।

**श्रीजिनभक्तिसूरीन्द्र-पट्टभासनभास्कराः ।**
**श्रीजिनलाभसूरीन्द्राः आसंश्चन्द्रकुलेश्वराः ॥१॥**

**प्रीतिसागरनामानः, श्रीमन्तस्तत्सतीर्थ्यकाः ।**
**वाचकाऽमृतधर्माख्यास्तेषां शिष्या विचक्षणाः ॥२॥**

**तद्विनेयेन क्षमादिकल्याणेन मनीषिणा ।**
**तर्कसङ्ग्रहसूत्रस्य सवृत्तेः फक्किका इमाः ॥३॥**

**यथा श्रुता गुरुमुखात् तथा सङ्कलिताः स्वयम् ।**
**वसु[8]नेत्र[2]सिद्धि[8]चन्द्र[1]प्रमिते हायने मुदा ॥४॥ चतुर्भिः कलापकम् ।**




**सुरतबिन्दरे इति शेषम् ॥**

**इति श्रीतर्कसङ्ग्रहफक्किका उपाध्यायश्रीक्षमाकल्याणविरचिता समाप्ता । श्रीरस्तु । सं. १८२४ रा. मि. वैशाखवदि २ दिने पं. अबीरेण लिखिता । शुभं भवतु । अजीमगंजमध्ये । कल्याणमस्तु ।**

● ● ●

श्री विजयमहोदयसूरि ग्रंथमाला - १४



प्रवचन प्रकाशन